अथ

दामोदर पंडित कृत

यंत्राचिंतामणी.

हें पुस्तक

बेळगांव येथें

आबाजी रामचंद्र सावंत

यांनीं

आपल्या " श्रीरामतत्व प्रकाश " छापखान्यांत

छापून प्रसिद्ध केलें.

शके १८१३

किंमत ८ आणे.

॥ अथयंत्रचिंतामणेरनुक्रमणिका. ॥
श्रीगणेशायनमः

अनुक्रमणिका·

अनुक्रमणिका

इति यंत्रचिंतामणेरनुक्रमणिका.

अथयंत्रचिन्तामणिः प्रारभ्यते.

श्रीगणेशायनमः ॥ श्रीसदाशिवायनमः ॥ श्रीसरस्वत्यैनमः ॥ ॥ यंध्यायंतिसुराऽसुराश्चनिखिला यक्षाःपिशाचोरगाराजानश्चतथामुनीन्द्रनिवहाः सर्वार्थदंसिद्धये ॥ भक्तानांवरदाभयप्रदकरपाशांकुशाङ्लक्ष्मचंचच्चामरवीज्यमानमनिशंसोऽहंश्रयेशंकरम् ॥ १ ॥ बभारदुःस्थान्मुनिपुंगवान्योबुध्वाथमंत्रैश्चदुरासदौजाः ॥ जाज्वल्यमानोदिशिदृश्यतेयः सभार्गवोमामवतान्छरण्यः ॥ २ यस्यप्रसादाद्वलिनोभवंतिजानंतिदैत्याविविधांचमायाम् ॥ योलब्धवान्मंत्रवरंषडंगंमृत्युंजयंदेववराद्गणेशात् ॥ ३ ॥ जालंधरेपीठवरेप्रसिद्धप्रत्यक्षरूपाभुविवर्ततेया ॥ गोत्रेतस्मिन्वेदविद्याप्रवीणेयोन्वाजेषीन्नास्तिकान्वेदबाह्यान् ॥ ४ ॥ तदन्वयेपंडितःसन्नृसिंहोज्वालामुखींनौमिमहाप्रभावां ॥ यायोगमायापरमार्थविद्याविशेषवंद्याभृगुवंशजानाम् ॥ ५ ॥ तस्यात्मजोभूच्छुचिधर्मशीलोनाम्ना

महादेवइतिप्रसिद्धः ॥ निसर्गवैरंप्रजहुःसुस-
त्त्वायंप्राप्यदुष्टाहितरक्षसंघाः ॥ ६ ॥ तस्मादा-
सीत्सुमतिविकसद्देवदत्तःकलावान्मान्योराज्ञां
सदसिविदुषांगद्यगंगाप्रवाहः ॥ उत्कल्लोलांदिशि
दिशिजनाःकीर्तिपीयूषसिंधुंयस्याद्यापिश्रवणपु-
टकैःकुंचिताक्षाःपिबन्ति ॥ ७ ॥ गंगाधरस्तत्तन-
योबभूवविवेकगांभीर्यगुणैरुदारः ॥ यंप्राप्यल-
क्ष्मीश्चसरस्वतीचतत्पादयुग्मंस्थिरतांचनूनम् ॥
८ ॥ दामोदरःसर्वकलाप्रवीणस्तस्माद्भूच्छ्रीग-
णनाथभक्तः ॥ लब्धप्रतिष्ठोगुरुदेवभक्तोमान्यः
सतांधर्मपरायणोऽयम् ॥ ९ ॥ दृष्ट्वानेकशिवाग-
मांश्चबहुलांश्चालोक्यसौरागमान्देवीशास्त्रमहा
गमांश्चविविधानालोक्यविस्तारतः ॥ कर्तुंवांछित-
संग्रहंसुमतिमान्दामोदरःसस्वयंलोकानांचहिताय
यंत्रनिकरंमंत्रेणयुक्तंस्फुटम् ॥ १० ॥ प्रेरितश्चंद्रचू-
डेनस्वप्नेतुद्विजपुंगवः ॥ चकारकृत्स्नंयंत्राणांचिंता-
मणिरितिस्फुटम् ॥ ११ ॥ पुराकैलासशिखरेना-
नाधातुविचित्रिते ॥ नानाद्रुमलताकीर्णेनानापु-

ष्योपशोभिते ॥१२॥ अप्सरोगणसंकीर्णेसिद्ध
चारणसेविते ॥ शिवभक्तैः सुरैर्दैत्यैःपन्नगैश्चवि-
राजिते ॥१३॥ योगध्यानैकनिपुणैस्तत्त्वविद्भिः
सुसेवित्ते ॥ आयुधैश्चेतनावद्भिरुदीरितजयस्वनैः
॥१४॥ एकनेत्रैर्द्विनेत्रैश्चत्रिनेत्रैरप्यनेत्रकैः ॥ एक
पादैर्द्विपादैश्चत्रिपादैश्चसहस्रशः ॥१५॥ महा
क्रूरैर्महाभीमैः करालैश्चविराजिते ॥ कंबलाश्वतर
नागैर्गीतध्वनिविराजिते ॥१६॥ इंद्राद्यैर्लोकपालै-
श्चबाणाद्यैरसुरैस्तथा ॥ दुर्वासाद्यैश्चमुनिभिःस
मंतात्परिसेवित्ते ॥१७॥ एवंभूतेचकैलासेदेवदेवः
स्वयंप्रभुः ॥ज्योतिर्मयोमृतमयोयोगचिंत्यःसदाशि
वः ॥१८॥ अव्यक्तोव्यक्तरूपोऽसौयत्रास्तेतु
स्वयंशिवः ॥ विष्णुनास्तूयमानस्तुप्रहृष्टस्तुसदा-
शिवः ॥१९॥ कदाचित्तुप्रविष्टोयमेकांतेपरमेश्वरः॥
हृष्टस्तुष्टः प्रसन्नात्मासृष्टिसंहारकारकः ॥२०॥
चिन्तामणौकल्पवरेसुतंत्रेश्रीचन्द्रचूडस्यमुखाद्वि
निर्गते ॥ तस्मिन्मयाऽद्याकिलपीठिकेयंकृताऽत्र
दामोदरपंडितेन ॥२१॥ ॥इतिश्रीयंत्रचिं

तामणौनाम्निमहाकल्पेप्रत्यक्षसिद्धिप्रदेउमा
महेश्वरसंवादेदामोदरपंडितोद्धृते प्रथमपीठिका
समाप्ता ॥ ॥ सपातुदेव्याः कबरीविलासोलास्ये
लसंत्यागिरिराजपुत्र्याः ॥ यंपश्यतोबालमृगांक
मौलेः क्षणेनसर्वज्ञपदंबभूव ॥१॥ एकदादेवदेवे
शंदृष्ट्वादेवीशुचिस्मिता ॥ उपगम्यशनैर्वाक्यंप्रो
वाचजगदम्बिका ॥२॥ श्रीदेव्युवाच ॥ ॥
देवदेवजगन्नाथकरुणाकरशंकर ॥ वर्णाश्रमाश्च
धर्माश्च संदेहाश्चमहाप्रभो ॥ ३ ॥ कौतुकानिस्वक
ल्पानिपुराणादीनिवैप्रभो ॥ श्रुतंसर्वमयात्वत्तः
सर्वज्ञोऽसियतः स्वयम् ॥ ४ ॥ मंत्राणांविनियोग
स्तुयंत्राणांनिर्णयस्तथा ॥ आचारभेदायेलोकेयो
गाभ्यासः सुदुर्लभः ॥ ५ ॥ सुदुर्लभतरंज्ञानंयज्ञ
कांडः सुदुर्लभः ॥ अनेकमंत्रयोगोवैवेदोक्तोपि
हिदृश्यते ॥ ६ ॥ तथैवागमभेदेषुउदितोहिनसं
शयः ॥ एवंद्विजाश्चमंत्रज्ञा दृश्यन्तेक्लेशभागिनः
॥ पाखंडिभिः पराभूतानास्तिकैर्वेदनिंदकैः ॥
विनामंत्रैर्जपैर्होमैरल्पक्लेशेनचप्रभो ॥ ८ ॥

तत्क्षणाज्जायतेसिद्धिः सुसिद्धासर्वकामदा ॥
मारणोच्चाटनाकृष्टेविद्वेषेस्तम्भनेतथा ॥ ९ ॥
अभिचारेषुसर्वेषुकाम्यार्थेषुचसर्वदा ॥ विवादेच
विवाहेचरणेवैरिजयेतथा ॥ १० ॥ एतत्सर्वंयथा
देवसिध्यतेसाधकस्यहि ॥ विचार्यदेवदेवेश रह-
स्यंपरमंवद ॥ ११ ॥ ॥ श्रीशिवउवाच ॥ ॥
वेदाचारोमयाप्रोक्तो ऋषीणांतु महात्मनाम् ॥
शिवधर्मस्तु मुक्तानां वैष्णवानां तु वैष्णवः ॥ १२
सौरंसांख्यंमयाप्रोक्तं बहूनांसिद्धिमिच्छताम् ॥
शाक्तंचबहुधाप्रोक्तंभैरवंबहुधाप्रिये ॥ १३ ॥
धर्मकामार्थमोक्षाणांज्ञानंचैवप्रकाशितम् ॥
रहस्यंगोपितंभद्रे सर्वत्राऽपिनसंशयः ॥ १४ ॥
रहस्यहीनोमंत्रस्तुध्यानेनाऽपिविशेषतः ॥ नासि-
ध्यतिवरारोहेकल्पकोटिशतेरपि ॥ १५ ॥ ॥
श्रीदेव्युवाच ॥ ॥ प्रसादंकुरु देवेशसुखोपायं
वदस्वमे ॥ सुरहस्यंसुबोधंचसद्यः प्रत्ययकारकं ॥
१६ ॥ विनाहोमेनजाप्येनपुरश्चरणसेवया ॥ कलौ
तुसिद्ध्यतेदेव तथोपायंवदस्वमे ॥ १७ ॥ ॥


श्रीशिवउवाच ॥ ॥ साधुसाधुमहाप्राज्ञे लो-
कानांहितकारके ॥ इदमित्थंनकेनापिपृष्टोऽहंप-
द्मलोचन ॥ १८ ॥ शृणुष्वैकाग्रचित्तात्वंरहस्यंक्ष-
णसिद्धिदम् ॥ कल्पंचिन्तामणिंनामगुह्याद्गुह्यत
रंमहत् ॥ १९ ॥ सर्वागमस्यसारंचमंत्राणांसार
मुत्तमम् ॥ अथर्वणस्यवेदस्यसारात्सारतरंपरम्
॥ २० ॥ अस्मिन्कल्पेभविष्यंतिचिंतामणिमये
शुभे ॥ यंत्राणिबहुधादेवीकाम्यकर्मकराणिच॥
२१॥ एतत्कल्पंसदायस्यलिखितंविद्यतेगृहे ॥
सपूज्यतेप्रतिदिनंप्रभावंतस्यवैशृणु ॥ २२ ॥
अल्पमृत्युभयंनास्तिनास्तिचौरभयंतथा ॥ भूतप्रे
तपिशाचानांप्रभावोनैवजायते ॥ २३ ॥ अन्य-
स्यकपटंनूनंनसिध्यतिकदाचन ॥ अविश्वासोन
कर्तव्यःसाधकेनवरानने ॥ २४ ॥ अभिचारो
भवेत्कल्पेह्यविश्वासान्नसंशयः ॥ संशयेनकृतंयं
त्रंविपरीतंप्रजायते ॥ २५॥ स्नानंकृत्वाशुचिर्भू
त्वापूजयेत्कुलदेवताम् ॥ लेखनीयंप्रयत्नेनएकांते
यंत्रमुत्तमम् ॥ २६ ॥ यस्यकस्यप्रयोगस्यविधिरे

षः प्रकीर्तितः ॥ दिनत्रयं प्रकुर्वीत पूजां भोगविधानतः ॥ २७ ॥ त्रिरात्रं भूमिशायी स्याद्ब्रह्मचर्यरतः शुचिः ॥ त्रिदिनाज्जायते स्वप्नं साधकस्य वराननें ॥ २८ ॥ सिद्धं साध्यमरिं चैव सुसिद्धमथवा ध्रुवम् ॥ अवश्यं वदति स्वप्ने मंत्राधिष्ठानदेवता ॥ २९ ॥ यदा न जायते स्वप्नं तदसाध्यं विनिर्दिशेत् ॥ नो चेद्यथाश्रुतं स्वप्ने तत्तथैवा विनिर्दिशेत् ॥ ३० ॥ श्रुखादेव मुखात्स्वप्ने फलसिद्धिं विधानतः ॥ यदा निवारितः स्वप्ने न दातव्यं त्रमुत्तमम् ॥ ३१ ॥ एवं विलिख्य यः कुर्यात्सिद्धिरेवप्रकीर्तिना ॥ अत एव मयोक्तानि यंत्राणि सुबहून्यपि ॥ ३२ ॥ येन मंत्रेण संसिद्धिर्येषां येषां प्रजायते ॥ तेन तेन हि न ग्राह्यं निषिद्धं तु परित्यजेत् ॥ ३३ ॥ विधिरेषः प्रसिद्धोऽस्ति यंत्राणां भूतले कलौ ॥ मंत्रकोष्टे तु पश्यंति सिद्धसाध्यादि साधकाः ॥ ३४ ॥ न तेषां जायते सिद्धिः कलिदोषात्कदाचन ॥ न चैक साधको लोके नैक प्रकृतिको जनः ॥ ३५ ॥ न चैक राशिनक्षत्रं न चैका कुलदेवता ॥ यंत्रबीजं तथा-

मंत्रंचतुर्धाभवतिप्रिये ॥ ३६ ॥ नवैकपंचमेसि-
द्धः साध्यः षट्दशयुग्मके ॥ त्रिसप्तरुद्रेसुसिद्धोवे-
दाष्टद्वादशेरिपुः ॥ ३७ ॥ सिद्धसाध्यावरिश्चेतिसु-
सिद्धस्तुतथापरः ॥ सिद्धः सिध्यतिकालेनसाध्यः
सिध्यतिवानवा ॥ ३८ ॥ अरिर्निकृंततेमूलंसुसिद्ध
स्तत्क्षणार्थदः ॥ तस्माद्दैववशाद्राशिकालंस्वमंम
होदयम् ॥ ३९ ॥ साधकस्यमनोभावंसम्यग्ज्ञात्वा
समाचरेत् ॥ ४० ॥ एतद्रहस्यंपरमंसमीरितंमंत्र
स्ययंत्रस्यचसिद्धिदायकम् ॥ एतद्विदित्वाऽखिल
सिद्धिभाजनंभवन्तुसर्वेभुविसाधकाःसदा ॥४१॥
चिंतामणौकल्पवरेसुगोप्यंश्रीचंद्रचूडस्यनियोगतो
हि ॥ यंत्रादिसाध्यंगमयींहिपीठिकांचकारदामोदर
विप्रवर्यः ॥ ४२ ॥ ॥ इतिश्रीयंत्रचिंतामणौना
म्निमहाकल्पेप्रत्यक्षसिद्धिप्रदेउमामहेश्वरसंवादे
दामोदरपंडितोद्धृतेद्वितीयपीठिकासमाप्ता ॥ ॥
॥ अथवश्याधिकारः ॥ ॥ एकोदेवः सजयति
शिवः सर्वदुःखांतकारी प्रादाच्चक्रंनयनकमलेना
र्चितोविष्णुनायः ॥ यः शृंगारीगिरिशतनयादत्त-

देहार्द्धभागोलोकानांयोहवनाधिधिरुत्कालकूटं
दधार ॥ १ ॥ राज्ञांवश्यकराणिदुष्टपुरुषस्त्रीणाज
नानांतथातान्युद्धृत्यमहागमाच्चबहुधायंत्राणि
बीजानिच ॥ अस्मिन्कल्पवरेक्रमेणविविधान्गं
गाधरस्यात्मजोनित्यंसत्यमतिः प्रवक्ष्यतित्नरांदा-
मोदरः सांप्रतम् ॥ २ ॥ ॥ श्रीशिवउवाच ॥
राजवश्यंमहायंत्रंशृणुदेविसुशोभितम् ॥कांस्य
भाजनमानीयशङ्खभस्मादिभिः कृतम् ॥ ३ ॥
जातीकाष्टेनविलिखेद्गोचलाच्चंदनेनच ॥ साध्य
नामलिखेन्मध्येवर्तुलंवेष्टयेत्ततः ॥ ४ ॥ तस्यो-
परिदलान्यष्टौवकारास्तत्रविन्यसेत् ॥ ततस्तद्वे-
ष्टयेत्सम्यग्वर्तुलंपूर्ववत्प्रिये ॥ ५ ॥ तस्योपरिप्र
कुर्वीतपद्मंषोडशपत्रकम् ॥ अकारादिस्वराले-
ख्यादलेप्रत्येकतः क्रमात् ॥ ६ ॥ ततस्तद्वेष्ट-
येत्सम्यग्रेखाभिस्तिसृभिस्ततः ॥ मल्लिकाजा
तिकुसुमैः सिताम्भोजैः प्रपूजयेत् ॥ ७ ॥ अन्यैश्चश्वे
तकुसुमैः सुगंधैः श्वेतकर्पटैः ॥ संपूज्ययंत्रराजंतं
महामोहनसंज्ञकं ॥ ८ ॥ एवंसप्तदिनंकृत्वात्रिलोहे

वेष्टयेत्ततः ॥ योधारयेत्तंशिरसिबाहुमूलेगलेऽथ-वा ॥ ९ ॥ योषिद्वापुरुषोवापिकृतनिश्चयसंयुतः॥ किंकराइवतेसर्वेवशीभूताः सदैवहि ॥ १० ॥इत्यंना म्नि महाकल्पे प्रत्यक्षसिद्धिप्रदेउमामहेश्वरसं वादे तृतीयपीठिकायांवशीकरणाधिकारे दामो-दरपंडितोद्धृतेमहामोहननाम प्रथमंयंत्रं ॥१॥




॥ ॥श्रीशिवउवाच ॥ ॥ अतःपरंप्रवक्ष्यामियंत्रंवैबीज संपुटम् ॥ राजवश्यकरंश्रेष्ठजन

वश्यकरंतथा ॥ एकपंक्तौसमालेख्यंर्ह्रींकारा
णांचतुष्टयम् ॥ र्ह्रींकारपुटितंपश्चात्साध्यनाम
लिखेद्बुधः ॥ २ ॥अधश्चचतुरोबीजान्र्ह्रींकारांश्च
पुनस्तथा ॥ रेखाद्वयंचतुष्कोणंभूर्जपत्रेलिखेद्बुधः
॥ ३ ॥ रोचनाकुंकुमेनैवश्रीखंडेनतथैवच ॥ अना-
मिकारक्तमिश्रैर्लिखेद्यंत्रंसुशोभनम् ॥ ४ ॥ एत
द्यंत्रंतदाकुर्याद्यदाक्रुद्धोनराधिपः ॥ वांछतेनिगडे
बंद्धुसर्वस्वंवापिनाशितुम् ॥ ५ ॥ तदातद्यंत्रराः
जंतुसंपूज्यविधिवत्स्वयम् ॥ नानापुष्पैः सुनैवे-
द्यैर्मांसैश्चविविधैःशुभैः ॥ ६ ॥ यथाशक्त्यातुसं
भोज्याःकुमार्योब्राह्मणास्तथा ॥ योगिन्यश्चसु-
वासिन्योनमस्कृत्यसुनिश्चितम् ॥ ७ ॥ तद्यंत्रं
मुष्टिमाबध्यगच्छेद्राज-
मन्दिरम् ॥ तत्कोपशमय
त्याशुवशीकरणमुत्तमम् ८
॥प्रसादस्तत्क्षणाद्विजा
यतेनात्रसंशयः ॥ ९ ॥इ-
तियंत्र० म· क· उ· म· सं· तृ· पी· व· कोपशमनंबीज

ह्रीँ	ह्रीँ	ह्रीँ	ह्रीँ
ह्रीँ	देवदत्तः		ह्रीँ
ह्रीँ	ह्रीँ	ह्रीँ	ह्रीँ

संपुटंनामद्वितीययंत्रम् ॥ २ ॥ ॥
॥ श्रीशिवउवाच ॥ ॥ अतःपरंप्रवक्ष्यामिस्वामिवश्यंमनोहरम् ॥ यद्गच्छेत्स्वामिनंकर्तुंयावज्जीवंहिमानवः ॥ १ ॥ तिर्यग्रेखाद्वयंकुर्याद्दीर्घंदक्षिणचोत्तरे ॥ अंतेतुकर्णिकांकुर्याद्दक्षिणेचोत्तरेपुनः ॥ २ ॥ प्रणवंचतथाश्रींचसाध्यनामतथैवच ॥ तदंते श्रींप्रणवंचलिखेन्मध्येतुसाधकः ॥ ३ ॥ उपर्यपि दलांस्त्रींश्चअधोभागेत्रयंतथा ॥ दक्षिणोत्तरपूर्वंच दलेषुविलिखेत्क्रमात् ॥ ४ ॥ क्षकाराः सविसर्गताः कोणेश्रींकारबीजकाः ॥ एवंलिखित्वातद्यंत्रं रोचनाभूर्जपत्रके ॥ ५ ॥ शरावसंपुटेक्षिप्त्वापूटय-




दग्निनाततः ॥ उद्धृत्यस्वांगशीतंचयंत्रभस्मपिबे-

न्नरः ॥ ६ ॥ यावज्जीवं भवेत्तस्य सवश्यो नाऽत्र संशयः ॥ तृतीयं तु समाख्यातं स्वामिवश्यकरं परं ॥ ७ ॥ इति श्रीयंत्रचिंतामणौ० उमाम० सं० तृतीय पीठिकायां वशीकरणाधिकारे दामोदरपंडितोद्धृते यावज्जीवं स्वामिवश्यकरं नाम तृतीयं यंत्रम् ॥ ३ ॥


॥ ॥ श्रीशिवउवाच ॥ ॥ यदा कस्याऽपि केनापि कार्यं निर्णाशितं भवेत् ॥ तदा महाभियोगेन दिव्यं कोपि प्रकारयेत् ॥ १ ॥ तदा तन्मोहनार्थाय कुर्याद्दिव्यं विचक्षणः ॥ रोचनाकुंकुमेनैव षट्कोणं भूर्जपत्रके ॥ २ ॥ कोणे कोणे तु ह्रींकारं मध्यदेशे लिखेन्नरः ॥ कोणांतराले ह्रींकारान्विलिखेत्तु षडेव हि ॥ ३ ॥ साध्यनाम लिखेन्मध्ये चतुर्ह्रींकारसंपुटम् ॥ उपर्यधः पूर्वचांते ह्रींकारांश्चतुरो लिखेत् ॥ ४ ॥ शरावसम्पुटे क्षिप्त्वा पूजयेद्भक्तिभावतः ॥ द्वितीयेह्नि तदाकृष्य यंत्रराजं सुपूजितम् ॥ ५ ॥ दिव्यकाले शिखायां तु बध्वा यंत्रं प्रयत्नतः ॥ मौनस्थश्चिंतयेत्कालं फलं वेगेन मानवः ॥ ६ ॥ न तदाऽस्य भयं किंचिद्यंत्रराजप्रसादतः ॥ दिव्यस्तंभो भवेन्नू-

नंसलोकेसाध्यतामियात् ॥ ७ ॥ ॥



इतिश्रीयंत्रचिंतामणौ॰ दिव्यस्तंभननामचतुर्थं
यंत्रम् ॥ ४ ॥ ॥ ॥ छ ॥ ॥
॥ श्रीशिवउवाच ॥ ॥ यदाकस्योपरिक्रुद्धोरा
जावांछतिमारितुम् ॥ तदातन्मोहनार्थायदुष्टनिग्र-
हणायच ॥ १ ॥ रोचनाकुंकुमेनैवलिखेद्यंत्रंतुभू-
र्जके ॥ ह्रीँसर्वसाध्यनामचद्वंतेह्रीँसस्तथैवच ॥


॥ २ ॥ पश्चात्तद्वेष्टयेत्सम्यक्चतुःकोणेतुरेखया॥ उपर्यधोदलांस्त्रींस्त्रीन्कोणेकोणेलिखेद्बुधः ॥३॥ ह्रींकारंच सकारंच सकारं ह्रींनथैवच ॥ एवंदलेषु प्रत्येकंलिखेद्बीजचतुष्टयम् ॥४॥ शरावसंपुटेक्षिप्त्वासंपूज्यचविधानतः ॥ दुष्टानांचमुखस्तंभः सवश्योभवतिक्षणात् ॥ ५ ॥ राजकोपहरनाम दुष्टमोहनकंपरम् ॥ एवंसप्तदिनंकार्यं संसिध्यतिनसंशयः ॥६॥ ॥५॥



इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पेप्रत्यक्षसिद्धिप्रदेउ॰ म॰ सं॰ नृ॰ पी॰ यां वशीक॰रे राजमोहनं दुष्टमुखस्तंभनंनामपंचमंयंत्रम् ॥ ५ ॥ ७ ॥

॥ ॥श्रीशिवउवाच ॥ ॥यदाक्रुद्धः प्रभुर्नूनं घातंकर्तुंहिवांछति ॥ तदास्वजीवरक्षार्थंयंत्रं मृत्युंजयंलिखेत् ॥ १ ॥ आनीयभूर्जपत्राणिलिखेत् पत्रद्वयोपरि ॥ मध्येनामलिखित्वातुचतुष्कोणंतु रेखया ॥ २ ॥ एवंसप्तचतुःकोणंलिखेल्लोहशलाकया ॥ तस्योपरिदलान्यष्टौचतुर्दिक्षुविलिख्यच ॥ ३ ॥ ईशानादौलिखेल्लृळालिलीलुलूचदक्षिणे ॥ लेलैलोलौपश्चिमेच ळंळः स्यादथचोत्तरे ॥ ४॥ एवंद्वादशदलेषुप्रत्येकंबीजमेककम् ॥ त्रिशूलंचचतुष्कोणेसबिंदुविलिखेन्नरः ॥ ५ ॥ एवंयंत्रद्वयंलेख्यंसंपुटंकारयेत्ततः ॥ निक्षिप्यभूमौतद्यंत्रंसाधकश्चोत्तरामुखः ॥ ६॥ तस्योपरिक्षिपेन्नूनंमहतीचशिलांदृढाम् ॥ पश्चात्तत्सन्मुखेगच्छेत्कोपस्तस्यप्रशाम्यति ॥ ७॥ मृत्युंजयमहायंत्रं प्राणरक्षाकरंपरम् ॥ यदाकस्योपरिक्रुद्धः कालोऽपिहिदुरासदः ॥ ८ ॥ तदाऽपियंत्रराजोऽयंरक्षत्येवनसंशयः ॥ ९ ॥

॥ ६ ॥



इतिश्रीयंत्रचिंतामणौ ना० ठ० म० सं० तृतीयपीठिकायांवशीकरणाधिकारे दामोदरपंडितोक्ते दुष्टवश्यकरमहामृत्युंजयनामषष्ठं यंत्रम् ॥ ६ ॥ ॥ श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्यामिविवादे विजयंनृणाम् ॥ यंत्रंकुर्यात्प्रयत्नेनसर्वलोकमनोहरम् ॥ १ ॥ मध्येनामलिखित्वातुवर्तुलंवेष्टयेत्ततः ॥ चतुर्दलं ततः कुर्याद्बीजयुक्तंतु मानवः ॥ २ ॥ ह्रीँ यँ ह्रीँ यँ प्रतिदलेरोचनाकुंकुमेनच ॥ भूर्जपत्रेसमालिख्यपूजयेद्भक्तिमान्नरः ॥ ३ ॥ धूपैर्दीपैः सुनैवेद्यैःपुष्पैर्नानाविधैः शुभैः ॥ त्रिलोहवेष्टितंयंत्रंदुग्धमध्येक्षिपेत्ततः ॥ ४ ॥ ततोगच्छेद्विवादार्थंजयेभोरत्यत्रसंशयः ॥ विवादविजयंनामयंत्रंदेवैः प्रपू-


जितम् ॥ ५ ॥ नदेयंयस्यकस्यापियदिच्छेत्सि-
द्धिमात्मनः ॥ ६ ॥

॥ ७ ॥




इतिश्रीयंत्रचिं० म० पश्चासिद्धि भदं रामाम० स० दा०
पी० वशीक० रे दा० पं० ते विवादविजयनामसप्तम
यंत्रम् ॥ ७ ॥ ॥ श्रीशिवउवाच ॥ ॥
यदातुदेवसूत्रेणद्रव्यनाशः प्रजायते ॥ धनिकोया
चतेद्रव्यंनिर्बंधेनाधमर्णिकं ॥ १ ॥ तस्यदातुंनवे
च्छेत्किंद्रव्याभावेकथंचन ॥ तदातन्मोहनार्थाय
यंत्रंमायामयंमहत् ॥ २ रोचनाकुंकुमेनैवभूर्ज
पत्रे सुविस्तृते ॥ षट्कोणंकारयेद्यत्नात्साध्यनाम

समन्वितम् ॥ ३ ॥ कोणांतरेबहिर्लेख्यंक्लींकारद्वा
दशांतथा ॥ ततस्तद्वेष्टयेत्सम्यग्वर्तुलंयंत्रमुत्तम-
म् ॥ ४ ॥ पंचविंशतिह्रींकारैश्चक्रवत्परिवेष्टयेत् ॥
ततस्तद्वेष्टयेत्सम्यग्वर्तुलेनैवपूर्ववत् ॥ ५ ॥ एवंस
प्तदिनंयंत्रंपूजयेद्विधिनाततः ॥ प्रत्यहंपूजयेद्देवीं
महामायांविचक्षणः ॥ ६ ॥ मार्कंडेयपुराणोक्तं दे
वीमाहात्म्यमुत्तमम् ॥ जपेत्सप्तदिनंयावत्ततोहो-
मंतुकारयेत् ॥ ७ ॥ अंतेपूर्णाहुतिंहुत्वाभोजयेत्क-
न्यकात्रयम् ॥ प्रतिश्लोकंचजुहुयात्पायसंमधुस
र्पिषा ॥ ८ ॥ त्रिलोहवेष्टितंकृत्वाबाहुमूलेगलेऽ
थवा ॥ तेनैवधृतमात्रेणधनिकोवश्यतामियात् ॥
नयाचतेचतद्द्रव्यंवाणिज्यार्थंददातिच ॥ १० ॥




इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पेप्र० सि० प्रदे उ० म० सं० तृ० पी० वशीकरणाधिकारे दामो० पंडितो क्तेधनिकउत्तमवर्णवश्यकरंनाममायामयमष्टमं यन्त्रम् ॥ ८॥ ॥श्रीशिवउवाच ॥ ॥ यदारा- जकुलेदुष्टाभवंतिपरिचारकाः ॥ पैशून्यंकुरुतेनि त्यंकार्यघातंप्रकुर्वति ॥ १॥ तदाकुर्यान्महायंत्रंदु- ष्टमोहनसंज्ञकम् ॥ मध्येनामलिखित्वातुवर्तुलंव ष्टयेत्ततः ॥ २॥ ततश्चाष्टदलंकृत्वाबीजानिविलि खेत्ततः ॥ सकाराः सविसर्गान्ताः कोणेकोणेतुवि- न्यसेत् ॥ ३ ॥ प्रणवंमुख्यादिग्लेख्यंचतुर्दिक्षुक्र मेणच ॥ ततस्तद्वेष्टयेत्सम्यक्चतुःकोणांहि रे- खया ॥ ४ ॥ खररक्तेनसंलेख्यंभूर्जपत्रेमनोहरे ॥ एतद्यंत्रंसुसंपूज्यप्रक्षिपेद्दुग्धमध्यतः ॥ ५॥



दुष्टाः सर्वे विनश्यंति राज्ञा मानं ददाति च ॥ एकविंश दिनं यावत्तावत्तत्रैव यंत्रकं ॥ ६ ॥ इति यंत्रचिंताम॰ उ॰ म॰ सं॰ तृतीयपीठिकायां वशीकरणाधिकारे दा॰ पंडितोद्धृतपिशाचवश्यकरं नाम नवमं यंत्रं ॥ ९ ॥


॥ ॥ श्रीशिव उवाच ॥ ॥ अथातः संप्रवक्ष्यामि विवादजयवर्द्धनम् ॥ व्यवहारे भयहरमिदं यंत्रं प्रशस्यते ॥ १ ॥ पूर्वपंक्तौ समालेख्यं ह्रीं मां ह्रीं च तथैव च ॥ तस्याधः साध्यनाम तच्चतुःकोणं नवेष्टयेत् ॥ २ ॥ कोणे कोणे दलं कुर्यान्मध्यदेशे तथैव च ॥ दक्षिणे रोधबीजं तु नैर्ऋते क्षं तथैव च ॥ ३ ॥ पश्चिमे स्तंभबीजं तु वायव्ये क्षं तथैव च ॥ उत्तरे क्षोभबीजं



तु ईशान्ये क्षं तथैव च ॥ ४ ॥ पूर्वे च मोहबीजं तु आग्नेयां क्षं तथैव च ॥ एवं चाष्टदले न्यस्य बीजानि ह्वादशैव तु ॥ ५ ॥ शरावसंपुटे क्षिप्त्वा यंत्रराजं जयावहं ॥ अभ्यर्च्य गंधपुष्पा-


धेर्दीपैश्चाष्टभिरेवच ॥ ६ ॥ लोकपालांस्तुसंपू
ज्यभोजयित्वाकुमारिकां ॥ बलिदीपैः प्रपूज्या-
थअष्टदिक्षु क्रमेणतु ॥ ७ ॥ तावत्पूज्यंप्रयत्ने
नयावत्कार्यंचसिध्यति ॥ व्यवहारजयंनामवि
वादविजयंतथा ॥ ८ ॥ राज्ञांकुलविवादेचजयं
न्नास्त्यत्रसंशयः ॥ मानोन्नतिर्भवेत्तस्ययंत्रराः
जप्रसादतः ॥ ९ ॥ ॥ इतिश्रीयंत्रचिंतामणौना
म्निमहाकल्पेप्रत्यक्षसिद्धिप्रदेउमाम० सं० तृ०पी
ठिकायांवशीकरणाधिकारे दा० पं० ते व्यवहारेवि
वादेचजयदं नामदशमंयंत्रम् ॥ १० ॥ ॥
श्रीशिवउवाच ॥ ॥ यमिच्छेद्वशगंकर्तुंयावज्जी
वंवरानने ॥ तदायंत्रंप्रकुर्वन्तिगाणपत्यंसुसिद्धि
दं ॥ १ ॥ भूर्जपत्रंसमानीयविस्तृतंछिद्रवर्जितं ॥
अनामिकारक्तमिश्रंहरिद्रस्यमदंतथा ॥ २ ॥
यावकस्यरसंचैवरोचनंचतथैवच ॥ एतच्चतुष्कं
संयोज्यजातीकाष्ठेन संलिखेत् ॥ ३ ॥ ह्रींकाराः
सप्तसंलेख्याः पूर्वपंक्तौवरानने ॥ अधःपंक्तौतु
संलेख्यक्रौं ह्रीं क्लीं गंतथैवच ॥ ४ ॥ साध्यनाम

तथागंचलुतःपंक्तौतृतीयके ॥ क्लीं ह्रीं क्रौंच
त्रिबीजानिह्रींक्लींक्रोंह्रींतथैवच ॥ ५ ॥ ततःप
ंक्तौचतुर्थ्यांचह्रींकाराणांचतुष्टयं ॥ एवंसंलेख्य
बीजानित्रिंशानिसमूहकं ॥ ६ ॥ पश्चात्तद्बहिर्य
त्सम्यक्चतुष्कोणंतुरेखया ॥ गंकारदशसंले-
ख्याः पूर्वपश्चिमचोत्तरे ॥ ७ ॥ प्राङ्मुखास्तुसु
संलेख्यास्त्रिंशत्संख्यागकारकाः ॥ सुक्षेत्रात्तु
समानीयमृत्तिकांकृष्णवर्णिकां ॥ ८ ॥ तयागण-
पतिंकृत्वायंत्रंतस्योदरेक्षिपेत् ॥ संपूज्यगंधपुष्पा
द्यैरिमंमंत्रमुदीरयेत् ॥ ९ ॥ देवदेवगणाध्यक्षसु-
रासुरनमस्कृत ॥ देवदत्त



महावश्यंयावज्जीवंकुरु
प्रभो ॥ १० ॥ इमंमंत्रस
मुच्चार्यहस्तमात्रंनिखन्य
च ॥ स्थित्वातत्रगणा-
ध्यक्षंपूरयित्वातुमृत्तिकां
११यावज्जीवंभवेद्वश्योग
णराजप्रसादतः ॥ १२ ॥

इतिश्रीयं० उ० म० सं० तृ० पी० यां वशीकरणाधिकारे दा० पं० ते यावज्जीववश्यकरंगाणपत्यंनामैकादशंयंत्रम् ॥ ११ ॥ ॥ श्रीशिवउवाच ॥ ॥
अथातः संप्रवक्ष्यामिजनवश्यकरंपरं ॥ मध्येनाम लिखित्वातुईकारंविलिखेदधः ॥ १ ॥ त्रिरावृत्तंतु संवेष्ट्यभूर्जपत्रे सुविस्तृते ॥ चतुर्दलेलिखेत्पश्चात्पूर्वादौदिक्चतुष्टये ॥ २ ॥ ॐ नमोॐ नमोलेख्यंपश्चिमेपूर्वके दले ॥ ॐ अजिते अजिते चैवलिखेद्दक्षिणचोत्तरे ॥ ३ ॥ राजवश्यकरंनामयंत्रराजंमनोहरं ॥ त्रिदिनंपूजयेन्नित्यंब्रह्मचर्यरतो नरः ॥ ४ ॥ ब्राह्मणंभोजयेच्चैकंचतुर्थेऽह्निसुप्रभे ॥ त्रिलोहवेष्टितंकृत्वाबाहुमूलेचधारयेत् ॥ ५ ॥ हैमंवराजतंचैवताम्रंचैवविशेषतः ॥ यंत्रस्य धारणंश्रेष्ठंबाहुमूले




गलेऽथवा ॥ ६ ॥ सर्वेषांचैवयंत्राणांविधिरेषउदा
हृतः ॥ सुभगोदर्शनीयश्चस्वजनानांविशेषतः ॥७
॥ यंत्रस्यधारणाद्देविसभवेन्नात्रसंशयः ॥ कर्पूर
कुंकुमाभ्यांचरोचनागरुकेसरैः ॥ ८ ॥ लिखेद्यंत्र
वरंश्रेष्ठंमंत्रतंत्रविचक्षणः ॥ ९ ॥ इतिश्रीयंत्र
चिं० म० प्र० उ० नु० पी० व० दा० यावज्जीवजनवश्य
करंनामद्वादशंयन्त्रम् ॥ १२ ॥ ॥
श्रीशिवउवाच ॥ ॥ जगद्वश्यमहायंत्रंशृणु
देविसुशोभनम् ॥ कर्पूरंमृगनाभिश्चचंदनंरोचनं
तथा ॥ १ ॥ जातीकाष्ठनसंलेख्यभूर्जपत्रेप्रयत्न
तः ॥ प्रणवंचवकारंचजंह्रींडंचतथैवच ॥ २ ॥
पूर्वपंक्तौतुसंलेख्यताराद्यंबीचपंचकं ॥ देंडंह्रीं
प्रणवंचैवडकारंचतथैवच ॥ ३ ॥ पंक्तौद्वितीयेसं
लेख्ययत्नतोबीजपंचकं ॥ तृतीयपंक्तौसंलेख्य
वकारंतदनंतरं ॥ ४ ॥ उकारंचजगन्नामवकारतद
नंतरं ॥ ह्रींकारश्चततश्चांतेएवंवैबीजपञ्चकं ॥ ५ ॥
तत्रापिविलिखेन्नूनंठकारंतुचतुर्थकम् ॥ एवंबी-
जानिसंलेख्यचतुःकोणंतुकारयेत् ॥ ६ ॥ विलिख-

यामहाकार्यंजगद्वश्यकरंपरम् ॥ पूजयेच्चदिनंदे-
धिसुगंधैः सुमनोहरैः ॥ ७ ॥ त्रिलोहवेष्टितंकृत्वा
धारयेद्बाहुमध्यतः ॥ जगद्वश्यंभवेत्तस्ययंत्रंयाव
द्युतिष्ठति ॥ ८ ॥ संपूज्य
नित्यमेवादौयंत्रंदेवार्चना
दिषु ॥ ९ ॥ इतिश्रीयं० चिं०
ना० म० प्र० उ० तृ० वं० दा०
जगद्वश्ययंत्रयोदशंयंत्रम्
॥ १३ ॥ ॥

ॐ	वं	जें	ह्रीं	हं
दैं	ठं	ह्रीं	ॐ	इं
वं	उं	जगत्	वं ठं	ह्रीं


श्रीशिवउवाच ॥ यदास्वभृत्यः क्रुद्धः सन्मर्मसर्वप्र
काशते ॥ नशक्यतांनिराकर्तुंदेशकालबलेनच ॥ १
तदातन्मोहनार्थायस्वकीयार्थप्रसिद्धये ॥ यंत्रंपि-
शाचिकानामकर्तव्यंसुविचक्षणैः ॥ २ ॥ साध्यना
मलिखित्वातुवर्तुलंवेष्टयेत्ततः ॥ चतुर्दलंतुकर्त-
व्यंबीजयुक्तंमनोहरं ॥ ३ ॥ ह्रींकारांश्चतुरोलेख्या
दलमध्येचतुर्दिशं ॥ रोचनाभूर्जपत्रेतुलेखन्या-
विलिखेन्नरः ॥ ४ ॥ संपूज्यगंधपुष्पाद्यैर्धूपैर्नाना
विधैरपि ॥ ततस्तद्दधिमध्येतुक्षिपेद्यंत्रवरंशुभे ॥

॥ ५ ॥ सवश्योजायतेनूनं यंत्रराजप्रसादतः ॥ यंत्रंपि शाचिकंनाम भृत्यवश्यकरं परं ६ नदेयंयस्यकस्यापि स्वयंरुद्रेणभाषितम् ॥ ७॥ इ० यं० चिं० ना० म० प्र० उ० नृ० व० दा० भृत्यवश्यकरं



पिशाचिसंज्ञंचतुर्दशंयंत्रम् ॥ १४ ॥ श्रीशिवउ० ॥ क्रूरःप्रकृतिकःस्वामीयदासंसेव्यतेजनैः ॥ सेव्यमानोपिहिसदाभवत्येवदुराग्रही ॥ १ ॥ खलैःपरिवृतोनित्यंदुराचारोमहीपतिः ॥ उत्तमोवाधमोवापिम्लेच्छोवाप्रभुतांगतः ॥ २ ॥ यंत्रंकालानलंकुर्यात्तदानद्वश्यसिद्धये ॥ साध्यनामाक्षरंलेख्यं ह्रींकारे गर्भमध्यगं ॥ ३ ॥ यावंतश्चाक्षरानाम्नितावंतश्च तथालिखेत् ॥ ईकारमंतेसंलेख्यंरोचनाभूर्जपत्रके ॥ ४ ॥ त्रिरावर्तंचतुःकोणंदीर्घेणफलवत्कृतम् ॥ राजिकाप्रतिमांकुर्यात्तत्पादस्यचपांशुना ॥ ५ ॥ तन्मध्येप्रक्षिपेत्तस्ययंत्रंकालानलंमहत् ॥ संपू-

ज्यप्रतिमांतांतुचुल्लीपार्श्वेनिखन्यच ॥ ६ ॥ पूरवे
त्तांप्रयत्नेनचतुर्दश्यांमहानिशि ॥ एतत्करणमात्रेण
सवश्योजायतेध्रुवं ॥ ७ ॥ अजारक्तेनसंमिश्रंभक्तं
पूपंतथैवच ॥ बलिदानंप्रदातव्यंदिक्पालप्रीतयेत
दा ॥ ८ ॥ महाकालायस्वाहेतिमंत्रेणजुहुयात्ततः ॥
एवंक्रमेणसंस्कृत्यनलअष्टोत्तरशत ॥ ९ ॥ तदेवभ
क्तंसाज्यंतुरक्तपुष्पेश्चमिश्रितं ॥ यंत्रंकालानलंना
माभ्रिदशैरपिपूजितम् ॥ १० ॥ इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰



तृ॰ पी॰ व॰ दा॰ क्रूरवशीकरणंकालानलंनामपंचदशं
यंत्रम् ॥ ॥ ॥ श्रीशिवउवाच ॥ ॥ वा
णिज्यार्थंतुवाणिज्यंलाभार्थंवांछितंपथि ॥ तेषामं
ध्येयदाकोऽपिप्रदुष्टोजायतेनरः ॥ १ ॥ मार्गदेशेप्रभु


र्पापितदायंत्रंप्रकल्पयेत् ॥ ह्रींकारोदरमध्येतुसा-
ध्यनामलिखेन्नरः ॥ २ ॥ उपरिष्टाच्चतुर्दिक्षु स्वा-
हांतंप्रणवादिकं ॥ मध्येआकर्षयलिखेच्चतुर्दिक्षु
क्रमेणतु ॥ ३ ॥ पश्चात्तद्वेष्टयेद्यंत्रंचतुःकोणंहिरेख-
या ॥ कोणेकोणेत्रिशूलौद्वौचतुर्दिक्षुप्रकल्पयेत् ४
एवंकृत्वाप्रयत्नेनपूजयित्वासुगंधकैः ॥ स्वरक्तेनतु
संमिश्रंरोचनाभूर्जपत्रके ॥ ५ ॥ लिखित्वाखंडक-



रंकृत्वारहसिप्र
क्षिपेत्ततः ॥
ओमाकर्षयस्वा
हाइमंमंत्रंजपे
त्तदा ॥ ६ ॥
तत्क्षणाज्जाय
तेवश्योमहाक्रू
रोपिमानवः ॥
७ ॥ इतियंत्रचिं०

ना० म० म० उ० सं० तृ० पी० व० दामोदरपंडितोद्धृतेदुष्ट
वशीकरणंउच्छिष्टपिशाचिकंनामषोडशंयंत्रं ॥ १६ ॥


॥श्रीशिवउवाच॥ यदामहाबलःशत्रुर्घातंकर्तुंहि वांछति। तदातत्सानुकूल्यार्थंयंत्रंकुर्वीतकंटकं॥ १॥ साध्यनामलिखेन्मध्येवर्तुलंवेष्टयेत्ततः॥ ईकारश्चभ्यकारश्चविसर्गोतश्चतुर्दिशं॥ २॥ एकेंकतुलिखित्वातुवर्तुलंवेष्टयेत्ततः॥ श्मशानभस्मनालख्यमर्कपत्रद्वयोपरि॥३॥ संपुटंमेलयित्वातुवेधयेत्कंटकैस्ततः॥निखन्यपूरयेद्यंत्रंश्मशानेनिशि पूजितं॥ ४॥ बलिदानंप्रदातव्यंभूतेभ्यःप्रयतोनरः॥ तत्क्षणाज्जायतेशत्रुःसानुकूलोनसंशयः॥५॥ कंटकाख्यंमहायंत्रंदुष्टमोहनकंपरं॥ तत्त्वशात्याद्दक्षिणांदद्यात्कालराशिःप्रीयतामिति॥ ६



॥इतियं॰चिं॰ना॰म॰ग्रं॰ उ॰म॰सं॰ वं॰दा॰ महाशत्रुसानुकूल्यकरकंटकाख्यनाम सप्तदशंयंत्रम्॥१७॥ ७ ॥


॥श्रीशिवउवाच॥ सुहृदोबंधुवर्गोवाशत्रुर्वक्रि-

ध्यतेयदि ॥ तदातत्कोपशांत्यर्थंकुर्याद्यंत्रंविचक्ष
णः ॥ १ ॥ मध्येनामलिखित्वातु वर्तुलंवेष्टयेत्त
तः ॥ उपर्यधश्चोत्तरेचदक्षिणेचतथैवच ॥ २ ॥
बिंदुवर्यंचतुर्दिक्षुवेष्टयित्वालिखेत्तदा ॥ हुंकारंतु
लिखेद्गर्भेबिंदुमध्येउपर्यधः ॥ ३ ॥ दक्षिणेचोत्तरे
चैवसाध्यनामचपूर्ववत् ॥ अंतेहुंकारसंयुक्तमधः
पंक्तौप्रसादय ॥ ४ ॥ एतद्यंत्रंसुसंलेख्यंताल
पत्रेसुविस्तृते ॥ कंटकेनायसेनैवविलिखेत्सोमवा-
सरे ॥५॥ कुलालमृत्तिकामध्येयंत्रंक्षिप्त्वातुगोल-
कम् ॥ कृत्वापूजाप्रयत्नेनयस्मात्कोपःप्रशाम्यति
॥ ६ ॥ जामदग्न्यंमहायंत्रसद्यःकोपहरंपरम् ॥
अक्रोधनःसत्यवादीजमदग्निर्दृढव्रतः ॥ ७ ॥ रा-
मस्यजनकःसाक्षात्सत्वमूर्त्तेनमोस्तुते ॥ एवं
मंत्रंसमुच्चार्यपूजयित्वाप्रयत्नतः ॥ ८ ॥ एव
सप्तदिनंकार्यंक्रोधापहरणम्परम् ॥ सप्तमेह्नि
पूजनीयोब्राह्मणोवेदपारगः ॥ ९ ॥ नोचेद्दु-
ध्योदनंदेयंमनुष्याहारपूरितम् ॥ क्रोधस्तुहृद-
याद्यातिप्रसन्नोजायतेक्षणात् ॥ १० ॥



इतिश्रीयंत्र० ना० म० म० उ० तृ० व० दा० क्रोधशमनंजा मदग्न्यं नामाऽष्टादशंयंत्रम् ॥ १८ ॥ श्रीशिवउवाच॥ ॥ ॥अतःपरंदेवितवब्रवीमिदौर्भाग्यहंत्रीणिचकामिनीनां ॥ यंत्राणि सौभाग्यविवर्धनानि सम्मोहनानिप्रियकामुकीनाम् ॥ १ ॥ एकपंक्तौतुसंलेख्यं-ह्रींकारत्रितयंशुभम् ॥ तस्याधस्तात्समालेख्यं नामवैरमणस्यच ॥ २ ॥ ततःपंक्तौतृतीयेतुह्रींकात्रितयंपुनः॥ ततस्तदूर्ध्वंयत्सम्यक्चतुःकोणंतु


रेखया ॥ ३ ॥ ततश्चाष्टदलं कृत्वाबीजन्यासंप्रक-
ल्पयेत् ॥ ह्रींकारंभितयंलेख्यंचतुर्दिक्षुवरानने ॥ ४ ॥
कोणेकोणेदलेन्यस्यह्रींकारंतुविचक्षणः ॥ रोचना-
कुंकुमेनैवमृगनाभिस्तुचंदनम् ॥ ५ ॥ एकीकृत्य-
लिखेद्यंत्रंभूर्जपत्रेसुविस्तृते ॥ त्रयोदश्यांसितेपक्ष
साधकश्चोत्तरामुखः ॥ ६ ॥ तद्यंत्रंपूजयेन्नित्यंरात्रौ
रात्रौवरानने ॥ भोगैर्नाना विधैःपुष्पैर्वस्त्रा स्त्रालंकार भूषणैः ॥ ७ ॥ एवंससदि नंकुलातदं तेतवतुष्टये ॥ स्त्रियःसौ भाग्यसंयुक्ता



भोजयेत्सप्तसंख्यया ॥ ८ ॥ शंकरस्यप्रियेदेवि
ललितेप्रीयतामिति ॥ रूपंदेहियशोदेहिसौभाग्यं

देहिमेश्रियं ॥ ९ ॥ भगवतिवांछितंदेहिप्रियमायु
ष्यवर्धनम् ॥ एवंमंत्रंसमुच्चार्यततश्चार्घ्यंविसर्जये
त् ॥ १० ॥ तद्यंत्रंधातुनावेष्ट्य सदाकंठेतुधारयेत्
॥ सुभगारूपसंपन्नापतिप्रियतमाभवेत् ॥ ११ ॥
ललिताख्यंमहायंत्रंस्त्रीणांसौभाग्यकारकम् ॥
१२ ॥ इतियंत्रचिं॰ना॰म॰प्र॰उ॰नृ॰व॰दा॰ स्त्रीणांसौ
भाग्यकरंललिताख्यमेकोनविंशयंत्रम् ॥ १९ ॥
॥ श्रीशिवउवाच ॥ ॥ शृणुदेविप्रसन्नेनयंत्रंभर्तृप्र
सादनम् ॥ संलिख्याथप्रियंनामसांकारपुटितंशु
भम् ॥ १ ॥ अधोपरितयालेख्यंसांकारहितयंशु
भम् ॥ ततस्तद्वेष्टयेत्सम्यक्वर्तुलंरेखयैकया ॥ २
॥ तस्योपरिदलान्यष्टौह्रींकारसहितान्लिखेत् ॥
रोचनाकुंकुमेनैवभूर्जपत्रेलिखेन्नरः ॥ ३ ॥ त्रिदिनं
पूजयेन्नित्यंरात्रौरात्रौतुपूर्ववत् ॥ ततःस्नात्वाचतुर्थे
ह्निपूजयेत्सुभगात्रयम् ॥ ४ ॥ अनंगवल्लभंदेवित्वंच
मप्रीयतामिति ॥ एनंप्रियंमहावश्यंकुरुत्वंस्मरवल्ल
भे ॥ ५ ॥ एतन्मंत्रंसमुच्चार्यपूजयित्वातुताःस्त्रि
यः ॥ तद्यंत्रंधातुनावेष्ट्यकृत्वाकंठेप्रधारयेत् ॥ ६


पतिर्दासोभवेत्तस्या यंत्रराजप्रसादतः ॥ सौभाग्य मतुलंतस्याजायते नात्रसंशयः ॥७॥ नसपत्नींगणयति सौभाग्यमदर्पितां ॥ एकासुवासिनी भोज्याचतुर्दश्यां सितेतरे ॥८॥ प क्षेपक्षेरतिप्रीत्यैपू



ज्यंयंत्रंतुनित्यशः ॥ यासांतासांनदातव्यंयंत्रंसौ-भाग्यवर्धनम् ॥ ९ ॥ इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ तृ॰ व॰ दा॰ स्त्रीणांसौभाग्यकरंविंशतिमंयंत्रं ॥ २० ॥ ॥

॥ श्रीशिवउवाच ॥ योषिद्वश्यंप्रवक्ष्यामिशृणुदेवि-सुशोभनं ॥ रोचनाकुंकुमेनेवश्रीखंडमृगनाभिना ॥ १ ॥ भूर्जपत्रेतुसंलेख्यंजातीकाष्ठेनयंत्रकम् ॥ ऐंह्रींक्लींचततोनामऐंह्रींक्लींचपुनस्तथा ॥ २ ॥ एवं संपुटितंकृत्वाचतुःकोणंतुवेष्टयेत् ॥ उपर्यधोपिवि-लिखेत्पंचबीजानियत्नतः ॥ ३ ॥ ऐंह्रींक्लींचतथा

क्षीँ च ऐँ चांते च पुनस्तथा ॥ कोणेषु विन्यसेद्बीजान् ऐँ ह्रीँ क्लीँ च तथैव च ॥ ४ ॥ दलाकृतिस्तु कर्तव्या बीजानामुपरिक्रमात् ॥ एवं चतुर्दलं कृत्वा बीजयुक्तं मनोहरं ॥ ५ ॥ राजिकाप्रतिमां कृत्वा मदनस्य तु काष्ठके



तस्या हृदि तु संस्थाप्य तद्यंत्रं पूजयेत्ततः ॥ ६ ॥ भोगैश्च विविधैर्गन्धैर्धूपैर्दीपैः फलैः शुभैः ॥ रात्रौ रात्रौ-

प्रकर्तव्यादिनांतेप्रत्यहंशुभे ॥ ७ ॥ एवंकृतेचसा नारीदासीनूनंप्रजायते ॥ यंत्रंश्रीकामराजाख्यंयो षिद्वश्यकरंपरं ॥ ८ ॥ संपूज्योमदनश्चात्रराजिका प्रतिमोदरे ॥ कामोनंगः पुष्पशरः कंदर्पोमीनकेतनः ॥ ९ ॥ श्रीविष्णुतनयोदेवःप्रसन्नोभवमेप्रभो ॥ इ- तिपूजनमंत्रः ॥ एवंनित्यंप्रकर्तव्यंयावत्सावश्यता मियात् ॥ १० ॥ इ. यं. चिं. ना. म. प्र. उ. तृ. द. दा. स्त्री वश्यकरंकामराजाख्यमेकविंशंयंत्रम् ॥ २१ ॥ ॥ श्रीशिवउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिमानिनी मानदर्शनं ॥ यंत्रंसुदुर्लभंलोकेविख्यातंमानमर्द न ॥ १ ॥ तुरगस्यतुरक्तेनरोचनाभूर्जपत्रके ॥ प्र- णवंचततोह्रींचसाध्यनामाक्षरंपृथक् ॥ २ ॥ना माक्षराणिह्रींकारपुटितानिविचक्षणः ॥ आद्यंते प्रणवंलेख्यएकपंक्तौविचक्षणैः ॥ ३ ॥ ततस्तद्बू ष्टयेत्सम्यक्चतुः कोणंतुरेखया ॥ उपर्यधश्चसं लेख्यंपूर्ववह्नीजसंपुटम् ॥ ४ ॥ तिर्यग्भागेद्विभा- गेतुपूर्ववन्नामसम्पुटम् ॥ कोणेदलाकृतिं कुर्यान्मदनाकृतिमध्यतः ॥ ५ ॥ एवंयंत्रंसुसंले-


स्वयंमदनप्रतिमांशफभां ॥ मदनस्यतुकाष्ठेनकृत्वाहृदिविनिक्षिपेत् ॥ ६ ॥ सरंध्रंहृदयंकुर्याद्यथा यंत्रंसुतिष्ठति ॥ संवेष्ट्यप्रक्षिपेन्नूनंयंत्रंतस्योपरिस्फुटं ॥ ७ ॥ रक्तचंदनमाल्याद्यैःपूजयेत्प्र




त्यहंतुतत् ॥ एकविंशद्दिनंयावत्सातस्य वश्यता मियात् ॥ ८ ॥ इ. चिं. ना. म. प्र. उ. तृ. व. दा. स्त्री वशीकरणंमदनमर्दनंनामद्वाविंशंयंत्रम् ॥ २२ ॥

॥ श्रीशिवउवाच ॥ अतःपरंप्रवक्ष्यामि राजस्त्री

वश्यकारकं ॥ यथातदृष्टिपातेनकामबाणहताइव१ ॥ पतंतिसहसादृष्ट्वामानिन्योमदविह्वलाः ॥ रोचनाकुंकुमेनैवभूर्जपत्रेलिखेन्नरः ॥ २ ॥ कर्पूरेण समायुक्तंजातीकाष्टेनयत्नतः ॥ षट्कोणस्यतु मध्ये तुसाध्यनामप्रतिष्ठितं ॥ ३ ॥ क्रोंकारंसर्वतालेख्यंकोणोपरिप्रयत्नतः ॥ पूर्वकोणांतरालेतुह्रींकारहितयंलिखेत् ॥ ४ ॥ कोणमध्येलिखेच्चैकं ह्रींकारपूर्वसंमितं ॥ तत्सर्ववेष्टयेत्पश्चाद्वृत्तुलरेखया शुभं ॥ ५ ॥ दक्षिणेविदलं कुर्यादीशान्ये त्रिदलं तथा ॥ ह्रींकारंदलमध्येतुक्रमेण प्रविलेखयेत् ॥ ६ ॥ एवंविलिख्यतद्यंत्रंपूजयेद्भक्तिभावतः ॥ गंधपुष्पैःसुनैवेद्यैः शुक्लांबरधरः




स्वयं ॥ ७ ॥ चिंतयेत्तांस्त्रियंरात्रौयंत्रस्यपुरतः
स्थितः ॥ एवंसप्तदिनंकृत्वातदंतेब्राह्मणांस्त्रियः
॥ ८ ॥ संभोज्याविविधैर्भोज्यैः कामाक्षीःप्रीयता
मिति। शक्त्याचदक्षिणांदद्याद्भोजयेत्साधकः
स्त्रियम् ॥ ९ ॥ त्रिलोहवेष्टितंकृत्वाबाहुमूलेतुधा
रयेत् ॥ तंदृष्ट्वाराजपत्न्यश्चकंदर्पज्वरपीडिताः॥
१० ॥ स्वयंसंप्रार्थयेन्नित्यंकाकथेतरयोषिताम् ॥
११ ॥ इ·यं·चिं·ना·प्र·उ· नृ· व· दा· राजस्त्रीवश्यक
रंकामाक्षंनामत्रयोविंशंयंत्रम् ॥ २३ ॥ ॥
श्रीशिवउवाच ॥ ॥ अतःपरंप्रवक्ष्यामिबीजमेकं
महाफलं ॥ सततंधारयेन्नित्यंस्त्रीणांप्रियतरोभ
वेत् ॥ १ ॥ स्त्रीचेद्धारयतेनित्यंसासौभाग्यवती
भवेत् ॥ सौभाग्यजननंबीजंनृणांचैवविशेषतः ॥
२ ॥ एतद्बीजाक्षरंगोप्यंनदेयंयस्यकस्यचित् ॥
सकारंचहकारंचककारंचतथैवच ॥ ३ ॥ लं·
कारंचडकारंच ईकारांतंप्रतिष्ठितं ॥ एवंक्रमे
णसंयोज्य अक्षराणांचषट्ककं ॥ ४ ॥ ईकार
स्वरसंयुक्तंबिंदुनापरिशोभितम् ॥ सेवना



नीरयुक्तेनभूर्जपत्रेलिखेन्नरः ॥ ५ ॥ त्रिदिनंपूजनं कृत्वाहेम्नावेष्टयेत्ततः ॥ पुरुषोबाहुमूलेवानारीचेद्गलकेपुनः ॥ ६ ॥ धारयेद्बीजराजानंस्फुटंदौर्भाग्यनाशनम् ॥ महासौभाग्यजननंश्रीशिवेनप्रतिष्ठितं ॥ ७ ॥ इ. यं. चिं. ता. म. प्र. उ. लृ. व. दा. सौभाग्यजननंविजयनामचतुर्विंशंयंत्रम् ॥ २४ ॥ ॥ श्रीशिवउ० ॥

अतःपरंप्रवक्ष्यामियंत्रंसौभाग्यदायकं ॥ स्त्रीणामेवसमुद्दिष्टंयंत्रंकमलसंज्ञकं ॥ १ ॥ तस्यसंधारणाद्धेविंध्यागर्भवतीभवेत् ॥ मृतवत्सातुयानारीसालभेत्पुत्रमुत्तमम् ॥ २ ॥ धृत्वातुजायतेदेविजीवत्पुत्रानसंशयः ॥ रोचनाकुंकुमेनैवभूर्जपत्रेलिखेन्नरः ॥ ३ ॥ प्रणवंतुलिखेत्पूर्वंह्रींकारस्तदनंतरं ॥ ततोरमणनामंचह्रींकारांतंप्रतिष्ठितं ॥ ४ ॥ उपर्यधोपिविलिखेत्क्रोंकारमेककंतथा ॥ ततस्तद्वेष्टयेत्सर्वंवर्तुलंरेखयैकया ॥ ५ ॥ तस्योपरिदलान्यष्टौबीजाक्षरयुतानिच ॥ जूंकारंचचतुर्दिक्षुदलमध्येतुविन्यसेत् ॥ ६ ॥ ॐकारंचतथाह्रींचजूंकारंचतथैवच ॥ ह्रीं कारंचपुनर्लेख्यमेवंबीजचतुष्टयं ॥ ७ ॥ कोणेको-

णेदलेलेख्यंमध्यदेशेतुसाधकः ।। एवंयंत्रंसुसं
लेख्यंपूजयेत्तुदिनत्रयम् ।। ८ ।। भोजयेन्मिथुनं
चैकंलोकेशःप्रीयतामिति ।। पश्चात्तंतंतुनावेष्ट्य
त्रिलोहेनविशेषतः ।। ९ ।। वर्तुलंमणिवत्कृत्वा हारम
ध्येतुधारयेत् ।। धारणाज्जायतेदेविसौभाग्यमतु
लंमहत् ।। १० ।। पुत्रंचलभतेनूनंवंध्यात्वंचप्रशा-




म्यति ॥ कमलाख्यंमहायंत्रंसृष्टंतुब्रह्मणापुरा ॥ ११ ॥ नदेयंयस्यकस्यापिसाधकेनवरानने ॥ १२ ॥ इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पेप्रत्यक्षसिद्धिप्रदेउमामहेश्वरसंवादेतृतीयपीठिकायांवशीकरणाधिकारेदामोदरपंडितोद्धृतेसौभाग्यजननंकमलाख्यंनामपंचविंशयंत्रम् ॥ २५ ॥ ॥ स्वप्नेनसंप्राप्यसदाशिवाच्चदामोदरोऽत्रारचयच्चकल्पम् ॥ तस्मिन्महाकल्पवरेसुसत्येगतःसमाप्तिंप्रथमोऽधिकारः ॥ १ ॥ सद्यंत्रचिंतामणिसर्वसिद्धिदे श्रीचंद्रचूडस्यमुखाद्विनिर्गते ॥ तस्मिंस्तृतीयाकिलपीठिकामिमांचकारदामोदरपंडितःसुधीः ॥ २ ॥ वश्याभिधानंप्रथमाधिकारंश्रृणोतियोभक्तियुतोमनुष्यः ॥ तस्याशुदेवोभगवान्महेशोददातिलक्ष्मींविपुलांसुसिद्धिम् ॥ ३ ॥ इतिश्रीयं० ना० म० प्र० उ० दा० तृतीयपीठिकायुतोवश्याधिकारःसमाप्तः ॥ ॥ अथाकर्षणाधिकारः ॥ ॥ ॥

जयतिजगदशेषद्योतयद्दिव्यभासाविशदकिरणकांतिःप्रस्फुरच्चंद्रमौलिः ॥ विषमविषमहाहिप्रोल्लस


न्धारुहारः सततमसिततेजाज्ञानमूर्तिर्महेशः ॥ १
॥ चिंतामणौकल्पवरेचतुर्थीप्रारभ्यतेसंप्रतिपीठि
केयम् ॥ आकृष्टियंत्राणिपरिस्फुटानिविचारयाम्यत्रतुपीठिकायाम् ॥ २ ॥ ॥श्रीशिवउवाच
॥ संलिख्यनामानिचभूर्जमध्येगोरोचनाकुंकुमचंदनाभिः ॥ सकारबीजास्तुविसर्गयुक्तास्तस्योपरिष्टाद्विलिखेत्तुपंच ॥ १॥ इकारगंतेविनिवेश्यपश्चाद्विसर्गयुक्तौविलिखेत्सकारौ ॥ क्रौंह्रींतथाक्रौंचविलिख्यपंक्तौवर्णस्यपंक्तिर्महताक्रमेण ॥ २ ॥ एवंद्विपंक्तौतुविलिख्यपश्चान्नाम्नस्तथाधोविलिखेत्तुपंक्तिं ॥ ह्रींक्रौंतथाह्रींचतथैवचक्रौंविलिख्यनाम्नस्तुअधोविभागे॥ ३ ॥ ह्रींक्रौंतथाह्रींचविलिख्यपंक्तौतस्याप्यधोवैविलिखेच्चबीजे ॥ दकाररेफौतुविलिख्यपश्चात्संवेष्टयेत्त्रिःपरिवर्तनेन ॥ ४ ॥ संपूज्ययंत्रंविधिवच्चपश्चात्सूत्रेणसंवेष्ट्यसुपांडुरेण॥
उद्वर्तनेनस्वशरीरजेनविधायमूर्तिमनुजस्यनूनम्॥
॥ ५॥ निधायतस्याहृदियंत्रराजंपिधायचोद्वर्तनकेनपश्चात् ॥ संतापयेत्तंखदिरस्यवह्निनादिनत्रयं

यंत्रवरंत्रिसंध्यम् ॥ ६ ॥ ॐ देवदत्तं वेगेन आकर्ष-
य २ माणिभद्र स्वाहा ॥ तापनमंत्रोयम् ॥ एवंकृते
कर्षतिमाणिभद्रो देशांतरस्थंमनुजंचनूनं ॥ अत्यंत
दूरस्थमपिक्रमेणसमानयेद्यंत्रवरोहिनूनं ॥ ७ ॥ सं
पूजयंस्तापनशोष-
णाच्चश्रीमाणिभद्रो
भगवान्हिवीरः ॥८॥
इतियंत्रचिं·ना·म·प्र·
उ·म·सं·दा· चतुर्थपी-
ठिकायां आकर्षणा-
धिकारे माणिभद्रंनाम
प्रथमंयंत्रम् ॥ १ ॥




॥ श्रीशिवउवाच ॥ ॥ अतःपरंप्रवक्ष्यामियंत्रं
मित्रस्यदर्शनम् ॥ रक्तचंदनमिश्रेणस्वरक्तेनचभूर्ज
के ॥ १ ॥ मध्येनामलिखित्वातुवर्तुलंवेष्टयेत्ततः ॥
चतुर्दलंततःकुर्याद्बीजयुक्तंमनोहरं ॥ २ ॥ ह्रूंकारं
दलमध्येतुप्रत्येकंविलिखेत्क्रमात् ॥ एवंयंत्रंतु
संलिख्यपूजयेद्गंधपुष्पकैः ॥ ३ ॥ बलिपुष्पोपहा-

रैश्च सुगंधद्रव्यसंयुतैः ॥ प्रक्षिपेद्धृतमध्येतु आकृ
ष्टिस्त्रिदिनाद्भवेत् ॥ ४ ॥
इदंयंत्रंमहागोप्यंरक्षणी
यंप्रयत्नतः ॥ कस्याप्य
ग्रेनवक्तव्यंयदीच्छेत्सि-
द्धिमात्मनः ॥ ५ ॥ ॥
इतियं॰चिं॰ना॰म॰प्र॰उ॰
च॰ आ॰ द्वा॰ मित्रदर्शनंना
माद्वितीययंत्रम् ॥ २ ॥



॥ श्रीशिवउवाच ॥
अथातः संप्रवक्ष्यामियंत्रंत्रैपुरकंमहत् ॥ रोच-
नानीरयुक्तेनभूर्जपत्रेलिखेन्नरः ॥ १ ॥ मध्ये-
नामलिखित्वातु ह्रींकारपुटितंशुभं ॥ षट्कोणंतु
लिखेत्तस्मान्नामगर्भंमनोहरम् ॥ २ ॥ सोंकारान्
विलिखेत्कोणेमध्यतो बिंदुभूषिताम् ॥ एतद्यंत्रंतु
सम्पूज्यघृतमध्येविनिक्षिपेत् ॥ ३ ॥ प्रत्यहंपूजये
न्नित्यंप्रार्थयेत्त्रिपुरांततः ॥ आकर्षयमहादेवीदे
वदत्तंममप्रियं ॥ ४ ॥ ऐं त्रिपुरेदेवदेवेशितुभ्यंदा-
स्यामियाचितम् ॥ अनेनप्रार्थयेद्देवीं त्रिपुरांयंत्र

गांयजेत् ॥ ५ ॥ एवंकृते
सप्तमेह्नि आकृष्टिर्जायते
शुभे ॥ ६ ॥ इ. यं. चिं. ना.
म. प्र. उ. सं. चतु. आ. दा.
त्रैपुरंनामतृतीययंत्रम् ॥
३ ॥ ॥ श्रीशिवउवाच ॥



अथातः संप्रवक्ष्यामि मानिन्याकर्षणंशुभम् ॥ रह-
स्यंसर्वयंत्राणांनत्क्षणात्सिद्धिदायकं ॥ १ ॥ न-
वाच्यंयस्यकस्यापियंत्रराजंसुदुष्करं ॥ दक्षिणा
नामिकारक्तेनवामेकरतलेलिखेत् ॥ २ ॥ प्रणवंचत
थाह्रींक्लीं एकपंक्तौलिखेन्नरः ॥ तिंहांस्वाहेतिविल
यंतस्याधोविलिखेत्क्रमात् ॥ ३ ॥ तस्याप्यधोलि-
खेन्नामरमण्याश्चैवसुव्रते ॥
त्रिकोणंवेष्टयेत्पश्चाद्बीजाना
मुपरिप्रिये ॥ ४ ॥ एवंकृत्वा
तुसंपूज्यतत्रैवकुसुमैः शु-
भैः ॥ याममात्रेणसाना
रीसमायातिनसंशयः ॥



॥५॥ यंत्रंश्रीकामराजाख्यं देवानामपिदुर्लभम्
॥६॥ ॥इतियं·चिं·ना·म·प्र·उ·च·आ·दा· ल·
लनाकृष्टिश्रीकामराजाख्यंचतुर्थयंत्रम् ॥ ४ ॥
॥ ॥श्रीशिवउवाच॥ ॥ अथातःसंप्रवक्ष्यामि
यंत्रंवैदेवमातृकं ॥ कर्षणंनरनारीणांशृणुदेविमहा
फलं ॥ १॥ लाक्षारसेहरिद्राचमंजिष्टंभूर्जपत्रके
॥ लेखनीयंप्रयत्नेनएकांतेयंत्रमुत्तमं ॥ २ ॥मध्ये
नामलिखित्वातुत्रिकोणंवेष्टयेत्ततः ॥ तच्चापिवे
ष्टयेत्पश्चाद्वर्तुलंयत्नतःप्रिये॥ ३॥ तस्योपरिस्व
रालेख्या अकाराद्यास्तुषोडश ॥ ततस्तद्वेष्टयेत्स-
म्यग्रेखयानेत्रसंख्यया॥ ४ ॥ तस्यैवपादधू-
ल्याथप्रकुर्याच्छालभंजिका॥ तस्यायोनौतुसं
क्षिप्ययंत्रराजंसुपूजितम् ॥ ५॥ एवंकृतेतु-
क्लिष्टासासमायातिनसंशयः ॥ बहुनाऽत्रकिं-
मुक्तेनपतिनासममानयेत् ॥ ६ ॥ यंत्रराजो-
महागोप्योदेवमातृकसंज्ञकः ॥ ७॥ ॥

---


१ पादधूलीसहान्यमृत्तिकयाजलेनचमूर्तिंविधायेत्यर्थः ॥




इतिश्रीयंत्रचिंतामणौ नाम्निम० प्र० उ० च० पी० आकर्षणाधिकारे दा० मानिन्याकर्षणंदेवमातृकं नामपञ्चमंयंत्रम् ॥ ५ ॥ चिंतामणौकल्पवरेसुकल्पे श्रीचंद्रचूडस्यमुखाद्विनिर्गते ॥ तस्मिंश्चतुर्थींकिलपीठिकामिमांचकारदामोदरविप्रवर्यः ॥ १ ॥ आकर्षणंनाममहाधिकारंपूर्णंद्वितीयंहिमहाप्रभावं ॥ पंचैवयंत्राणिमहाप्रभावेरहस्यभूतानितुकीर्तितानि ॥ २ ॥ ॥ इ० यं० चिं० ना० म० प्र० उ० म० सं० दा० चतुर्थपीठिकायुतआकर्षणाधिकारः समाप्तः ॥ ॥ अथस्तंभनाधिकारः ॥ ॥ नारायणीतिनिगदंतिसदैवलोकायांविश्वमातरमितिप्रवदंतिकेचित् ॥ गंधर्वयक्षसुरसिद्धगणैस्तुतांतांविश्वेश्वरीममयदांत्रिगुणांनमामि ॥ १ ॥ संस्तंभनंनाममहाधिकारंविचारयामोत्रतुपीठिकायां ॥ यंत्राणिबीजानिशृणुष्व

देवीसंस्तभनानिक्षणासिद्धितानि ॥ २ ॥
श्रीशिवउवाच ॥ शृणुदेविमहायंत्रंस्तंभनंसर्ववै
णां ॥ विवादेव्यवहाराणांमुखस्तंभोभवेद्ध्रुवम् ॥
१ ॥ यदाकालवशाद्देविकलहः संप्रजायते ॥ तदाकु
र्यान्महायंत्रंजिह्वावेधनकंपरम् ॥ २ ॥ रोचनाभूर्ज
त्रेणसंलेख्यंसुविचक्षणैः ॥ षट्कोष्टकंप्रकुर्वीतरेखा
द्वितयकेनच ॥ ३ ॥ कोष्टमध्येलिखेद्बीजंप्रतिकोष्
मिहैककं ॥ हकारंचमकारंचलकारंतदनंतरं ॥ ४ ॥
बकारंचरकारंचयकारंचप्रतिष्ठितं ॥ ऊकारस्वरसं
युक्तंमस्तकेरेफसंयुतं ॥ ५ ॥ बिंदुमात्रार्द्धसंयु-
क्तंसंयोगेवर्णषट्ककं ॥ स्वरद्वितयसंयुक्तंबिंदुनाप
रिभूषितं ॥ ६ ॥ एवंसंजायतेबीजंमुखस्तंभनसं
ज्ञकं ॥ कोष्ठेकोष्ठेतुसंलेख्यमेकैकंबीजमुत्तमं ॥ ७ ॥
एवंबीजानिसंलेख्यरेखाद्वितयकेनच ॥ रेखोपरि
गताः कृत्वाकोणदेशाश्चतुर्दिशं ॥ ८ ॥ बाह्यरे
खोर्ध्वधोलेख्यात्रिशूलान्मस्तकोपरि ॥ सर्वतोरेख
याचांतेत्रिशूलान्विलिखेत्क्रमात् ॥ ९ ॥ एवमष्टाद
शसंख्यास्त्रिशूलाः संप्रतिष्ठिताः ॥ शूलांतराले

सर्वत्रतथोपरिलिखेत्क्रमात् ॥ १० ॥ ठकारबीजानि
सर्वत्रतथोपरिलिखेत्क्रमात् ॥ १० ॥ ठकारबीजानि
षडेवचोर्ध्वमधोपितावंतिविलिख्यनूनं ॥ दिग्दक्षि
णस्यांचतथात्रिबीजंतावंतिसंख्यानितथोत्तरेच ॥
११ ॥ एवंहिबीजानिठकारसंज्ञः श्रीसूर्यसंख्यानिवि
लिख्यपश्चात् ॥ संपूज्ययंत्रंविधिवत्प्रयत्नतोजपेत्तु
मंत्रंमनसासुनिश्चलः ॥ १२ ॥ ॐ ह्लसौं ललल
अमुकस्यमुखंस्तंभयस्तंभय ठः ५ स्वाहा ॥ अष्टोत्त
रंचैवशतंजपित्वामंत्रंत्रिसंध्यंत्रिदिनंप्रयत्नात् ॥




संपूजयेद्यंत्रवरं त्रिसंध्यं पीतैश्च पुष्पैः कनकावदातैः ॥ १३ ॥ एवंकृते शत्रुगतिं मतिंच संस्तंभयेद्यंत्रवरो हि नूनं ॥ मूढो महामूक इव प्रजायते ग्रस्तो ग्रहेणैव रिपुर्महोग्रः ॥ १४ ॥ इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ पंचमपीठिकायां स्तंभनाधिकारे दामोदरपंडितोद्धृते शत्रुसुखगतिमतिस्तंभनंनाम प्रथमं यंत्रम् ॥ १ ॥ ॥श्रीशिव उ०॥ अथातः संप्रवक्ष्यामि यात्रास्तंभनमुत्तमं ॥ शिलासंपुटके लेख्यं पीतद्रव्येण शोभनं ॥ १ ॥ रोचना हरितालंच हरिद्रांच मनःशिलां ॥ कुंकुमेन समायुक्तं पीतद्रव्यं प्रचक्षते ॥ २ ॥ कुंभे मोहेच बीजानि एकपंक्तौ लिखेन्नरः ॥ तस्याप्यधो लिखेन्नाम मोहे चांते प्रतिष्ठितं ॥ ३ ॥ ततस्तद्वेष्टयेत्सम्यक् चतुःकोणंतु रेखया ॥ कोणे कोणे त्रिशूलं तु मध्ये मध्ये तथैव च ॥ ४ ॥ कृत्वैवमष्टौ शू



लानियंत्ररेखोपरिस्थितान् ॥ संपूज्यपीतकुसुमैर्यं त्रराजंमनोहरम् ॥ ५॥ धूपैर्दीपैश्चनैवेद्यैर्नानाभ- क्ष्यसमन्वितैः ॥ एवंसंपूज्यतद्यंत्रंभूमिमध्येक्षिपे त्ततः ॥ ६॥ मृदापूर्यसमेदेशेयंत्रस्योपरियत्नतः॥ गमनंस्तंभयत्येवनात्रकार्याविचारणा ॥ ७ ॥ पथा रोपितभांडोपिनयात्येवप्रियेसदा ॥ ८॥ इ॰यं॰चिं॰ ता॰म॰म॰उ॰प॰स्तं॰दा॰ यात्रास्तंभनंनामद्वितीयंयंत्रं ॥२॥ ॥श्रीशिवउ॰॥ ॥ अथातःसंप्रवक्ष्या- मिवाचास्तंभंचसुंदरि॥ प्रतिवादिमुखस्तंभंयंत्र- रव्यालंतुभूतले ॥ १ ॥ पीतद्रव्येणसंलेख्यंशिलासं पुटमध्यतः ॥ रोचनाहरितालंचहरिद्रांचमनःशिलां ॥ २ ॥ कुंकुमेनसमायुक्तंपीतद्रव्यंप्रचक्षते ॥ मध्ये नामलिखित्वातुत्रिकोणंवेष्टयेत्ततः ॥ ३ ॥ ततस्तद्वे ष्टयेत्सम्यग्वर्तुलंरेखयैकया ॥ तस्योपरिदलान्यष्टौ प्रकुर्वीततत:परं॥ ४॥ दलमध्येलिखेद्बीजंलकारं बिंदुभूषितं ॥ एवंचाष्टदलेलेख्यंपूजयेत्कुसुमैःशुभैः

१ श्रीकर्णिकारंकुब्जंचंपकंस्वर्णकेतकी॥ धत्तूरंपीतकुसुमंनागकेसरमेवच॥१ ॥ आह्याण्येतानिपुष्पाणियथालाभंवरानने॥अन्यानिपीतवर्णानिनग्राह्याणि कदाचन॥ २॥


॥ ५ ॥ पीतवर्णैस्तथाधूपैर्दीपैर्नैवेद्यकैः शुभैः ॥ ब्राह्मणंभोजयेच्चैकंपायसेनगुडेनच ॥ ६ ॥ ततो निखन्यभूमौतुस्थापयेत्पूर्ववत्ततः ॥ विवादे व्यवहारेचशास्त्रचर्चासुचप्रिये ॥ ७ ॥ प्रतिवादिमुखस्तंभोजायते



नात्रसंशयः ॥ एतद्यंत्रंमहादेविसुगोप्यंकथितं तव ॥ ८ ॥ इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ पं॰ स्त॰ दा॰ प्रतिवादिमुखस्तंभनंनाम तृतीयंयंत्रम् ॥ ३ ॥ ॥


॥श्रीशिवउ॰॥ ॥ अतःपरंप्रवक्ष्यामिशत्रोर्वक्रस्यमुद्रणं ॥ यदासंजायतेवादःशत्रूणांसहसुव्रते ॥ १ ॥ तदायंत्रंप्रकुर्वीतसुगमंफलसिद्धिदम् ॥ खटिकयातुसंलेख्यंस्वभितौवेगतःप्रिये ॥ २ ॥ मध्ये नामलिखित्वातुशत्रोस्तु विधिवत्प्रिये ॥ तस्योपरिस्थितारेखावसुसंख्याष्टदिक्क्रमात् ॥ ३ ॥ रेखांतेचत्रिशूलानितल्लिखेच्चदिगष्टके ॥ तत्रैवतु

सुसंपूज्यश्वेतपुष्पैःफलैःशुभैः ॥ ४ ॥ अन्यैश्चश्वे
तगंधैश्चश्वेतवस्त्रैर्मनोहरैः ॥ ब्राह्मणंभोजयेच्चैकं
श्रीशिवः प्रीयतामिति ॥ ५ ॥ वादेपिशुनतांयांच-
मुखस्तंभंकरोत्ययम्
॥ ६ ॥ इतिश्रीयंत्रचिं०
ना॰म॰प्र॰उ॰ पं॰ स्तं॰ दा॰
मुखस्तंभनंनामचतुर्थं
यंत्रम् ॥ ४ ॥ ॥
॥श्रीशिवउवाच ॥ ॥
अथातः संप्रवक्ष्यामि




वह्निस्तंभंमनोहरं ॥ दिव्यकालेप्रकुर्वीतयंत्रराजं
सुशोभनं ॥ १ ॥ पीतद्रव्येणसंलेख्यंभूर्जपत्रेवरा
नने ॥ साध्यनाममलिखेन्मध्येक्रोंनामाद्यंतसंपुटं ॥
२ ॥ उपर्यधोपिविलिखेत्क्रोंकारंसुमनोहरं ॥ तत-
स्तद्बहिर्देविचतुःकोणंतुरेखया ॥ ३ ॥ तस्योपरि
चतुःकोणंप्रकुर्वीत द्विरेखया ॥ कोणांतरालेसंले-
ख्यंलकारंबिंदुभूषितं ॥ ४ ॥ एवंचतुष्टयंलेख्यं ल-
काराणांतुबीजकं ॥ कोणांतेतुपृथग्लेख्योत्रिशूलो

सर्वथाप्रिये॥ ५ ॥ एवमष्टत्रिभूलानिविलिख्याश्व मपूजयेत् ॥ संपूज्यब्राह्मणंभोज्यंयंत्रभूमौविनि क्षिपेत् ॥ ६ ॥ वह्न्युदकमार्गेचमध्येयंत्रंविधाय च ॥ यावत्तस्योपरियातिसलिलंवरवर्णिनि ॥ ७ ॥




तावदग्नेर्महास्तंभोजायतेनात्रसंशयः ॥ दिव्यस्तंभकरंनामयंत्रं देवैःसुपूजितम् ॥ ८ ॥ नदेययस्यकस्यापि यदीच्छेत्सिद्धिमात्मनः ॥ ९ ॥ इतिश्रीयं चिं॰ता॰म॰प्र॰उ॰ पं॰ स्तं॰ दा॰ वह्निस्तंभनंनामपंचमं यंत्रम् ॥ ५ ॥ ॥श्रीशिवउवाच॥ ॥ शृणुदे विप्रवक्ष्यामियंत्रंवह्निनिवारणं ॥ यस्मिन्गृहेस्थितं यंत्रंतत्रनाऽग्निभयंक्वचित् ॥ १ ॥ यस्यहस्तेसदा तिष्ठेद्यंत्रराजंमनोहरं ॥ सप्तप्यग्निभयंतस्यकदा चिन्नोपजायते ॥ २ ॥ बलात्कारेणकर्तव्यमग्निनि ग्रहकंप्रिये ॥ विद्यागमेतथामंत्रैरौषधेर्वाबलाधिके

३॥ पादस्पृष्टोयथासर्पोदशत्येवनसंशयते ॥ तथा स्तंभोपिदेवेशिबलात्कारणवाजनैः ॥ ४ ॥ अप-मृत्युंयथादेविहरेद्वैवैद्यकोरसः ॥ तथायंत्रोऽपि देवेशिभवांतरभयंहरेत् ॥ ५ ॥ श्रीखंडरोचन हिमेनतुलेखनीयंयंत्रंतुभूर्जेविधिवत्तुविस्तृते ॥ नामस्वकीयंतुविलिख्यमध्येसुचेष्टयेद्दत्तुलरेख यातथा ॥ ६ ॥ तस्योपरिलिखेन्नूनंवकारंबिंदुभूषितं ॥ पूर्वेचदक्षिणेचैवपश्चिमेचोत्तरेपुनः ॥७॥



एतत्सर्वंतुसंवेष्ट्यचतुःकोणंतुरेखया ॥ त्रिलोहवेष्टितंकृत्वाबाहुमूले गलेऽथवा ॥ ८ ॥ अथवागृहमध्येतुक्षीरमध्ये विनिक्षिपेत् ॥ एवंसंपूजयेन्नित्यंदेववद्देवियंत्रकं ॥ ९ ॥ अग्नेःसकाशाद्भीतिर्यासाऽस्मात्क्वापिन जायते ॥ ब्राह्मणंभोजयेदेकंयंत्रराजस्यतुष्टये ॥ १० ॥ इतियं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ पं॰ स्तं॰ अग्निस्तं॰


भनंनामषष्ठंयंत्रम् ॥ ६ ॥ ॥श्रीशिवउवाच॥
अथातः सम्प्रवक्ष्यामिप्रियसंस्तंभनंपरं ॥ यदा-
कोऽपिबलाद्यातिवारितोपिवरानने ॥ १ ॥ तदा
संस्तंभनंकुर्याद्यंत्रराजंशुचिस्मिते ॥ पीतद्रव्येण
संमिश्रंफलकेकाष्ठसंभवे ॥ २ ॥ खटिकयालिखे
द्यंत्रंमूलकेकाष्ठसंभवे ॥ जकारगर्भमध्येतुसा-
ध्यनाम प्रतिष्ठितं ॥ ३ ॥ ततस्तद्वेष्टयेत्सम्यक्च-



तुःकोणतुरेखया ॥ त-
स्योपरिचतुःकोणंद्विती
यंविलिखेद्बुधः ॥४ ॥
कोणेदलाकृतिंकुर्यान्म
ध्यदेशेकचिन्नरः ॥ दल
मध्येलकारंतु बिंदुयुक्तं-
लिखेत्प्रिये ॥ ५ ॥एवं
विलिख्यसंपूज्यविधिवद्यंत्रमुत्तमम् ॥अधोमुखे-
निबध्नीयात्फलकंगृहमध्यतः ॥ ६ ॥ यात्रास्तंभो
भवेद्देविनात्रकार्याविचारणा ॥ तथापिगच्छतेय-
स्तुगत्वानिवर्तत्यसौ ॥ ७ ॥ इ. यं. चिं. ता. म. भ.

उ॰ पं॰ स्तं॰ दा॰ यात्रास्तंभनंनामसप्तमंयंत्रम्॥ ७॥


श्रीशिवउवाच॥ अथातःसंप्रवक्ष्यामिवैरिवाक्स्तंभनंपरम्॥ खटिकयातुसंलेख्यंशिलासंपुटमध्यगं॥ १॥ ह्रींकारगर्भमध्येतु साध्यनामप्रतिष्ठितं॥ ततस्तद्वेष्टयेत्सम्यक्चतुःकोणंतुरेखया॥ २॥ एवंचतुश्चतुःकोणांलिखित्वायंत्रकंपरं॥ अंत्यकोणेत्रिशूलानिचतुर्दिक्षुचतुश्चतुः॥ ३॥ विलिख्यपूजयेद्यंत्रंविधिवत्कुसुमैःशुभैः॥ संपुटंमेलयित्वातु



स्थापयेद्यंत्रकं शुभं ॥ ४ ॥ तत्क्षणाज्जायते शत्रो- र्मुखस्तंभो न संशयः ॥ ब्राह्मणं भोजयेच्चैकं श्रीवि द्यामीयतामिति ॥ ५ ॥ इ॰ यं॰ चिं॰ ना॰ म॰ म॰ उ॰ पं॰ स्तं॰ वा॰ शत्रुमुखस्तंभननामाऽष्टमं यंत्रम् ॥ ८ ॥

॥ श्रीशिव उवाच ॥ अथातः संप्रवक्ष्यामि यंत्रं पि- शुनमुद्रणं ॥ यदा राजकुले देवि पिशुनः कोपि वैव देत् ॥ १ ॥ तदा यंत्रं प्रकुर्वीत नाम्ना पिशुनमुद्रणं ॥ शत्रोः स्तंभयते वाचं गतिं बुद्धिं वरानने ॥ २ ॥ रो चनाभूर्जपत्रेण लिखेद्यंत्रं सुशोभनं ॥ क्रोंकार पुटितं कार्यमक्षरं नाम संभवं ॥ ३ ॥ ह्रींकारपुटितं पश्चाद्द्वितीयं चाक्षरं पुनः ॥ नामाक्षराणि यावंति ता वत्संपुटितानि च ॥ ४ ॥ ततस्तद्वेष्टयेत्सम्यक् चतुः कोणं तु रेखया ॥ कोणे कोणे दलं कुर्याद्दीर्घबीजेन संयुतम् ॥ ५ ॥ यकारं च मकारं च वकारं च तथैव च ॥ चकारं च रकारं च यकारं तदनंतरं ॥ ६ ॥ एवं क्रमेण संयोज्य मक्षराणां तु षट्ककं ॥ ऊकारस्वर संयुक्तं मस्तके रेफभूषितं ॥ ७ ॥ बिंदुना तु समायु क्तं विलिखेद्दलमध्यतः ॥ एवं चतुर्दलं लेख्यं बीजं वे


सुरपूजितं॥ ८ ॥ दलांतरे संलेख्यं क्रोंक्षश्चैव च दिशम् ॥ एवं संलिख्य यंत्रं तत्पूजयेद्रक्तचंदनैः॥ रक्तपुष्पैस्तथा वस्त्रैः स्वरक्तेन च सुंदरि॥ यथाश क्त्या प्रदातव्या दक्षिणा ताम्रसंभवा ॥ १० ॥ ब्राह्मणान् भोजयेत्पश्चाद्वित्तशाठ्यविवर्जितः ॥ तस्मा त्रं निखन्याशु भूमिमध्ये विनिक्षिपेत्॥ ११ ॥ शुद्धि श्रत्रांगतिश्चशं वागश्चशं च वरानने ॥ पिशुनस्य द णाद्देवि जायते नात्र संशयः ॥ १२ ॥



इतिश्रीयं॰चिं॰ना॰म॰प्र॰उ॰ संवादे पं॰ पी॰ स्तं॰ दामो॰ पंडितोधृते पिशुनमुद्रणं नाम नवमं यंत्रम् ॥ ९ ॥

इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पेप्रत्यक्षसिद्धि
देउमामहेश्वरसंवादेदामोदरपंडितोधृतेपंचमपीठि
कायुतोस्तंभनाधिकारःसमाप्तः ॥ ॥ ॥
अथविद्वेषणाधिकारः ॥ ॥त्वरितंजानकींद्रष्टुं
निहंतुंरावणंयुधि ॥ पूजितारामचंद्रेणत्वरित्तांतान्
माम्यहं ॥ १ ॥ विद्वेषणनाममहाधिकारमारभ्यते
संप्रतितच्चतुर्थम् ॥ यंत्राणिबीजानिपरिस्फुटानि ॥
विचारयामोऽत्रतुपीठिकायां ॥ २ ॥दौर्भाग्यवैराणि
परस्परंतदाविवर्द्धंतेद्वेषमतीवबंधुषु ॥ यंत्रप्रभावा
त्सुविमानवानांप्रचक्ष्महेतानिपरिस्फुटानि ॥ ३ ॥
॥ ॥श्रीशिवउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामि
यंत्रंदौर्भाग्यवर्धनं ॥ विवादोनरनारीणांयेनसंजायते
सदा ॥ १ ॥ रोचनाकुंकुमेनैवभूर्जपत्रेवरानने ॥
लिखेद्यंत्रंमहादेवियंत्रंसौभाग्यनाशनं ॥ २ ॥ कुर्या
त्तिर्यग्गतारेखाः पूर्वपश्चिमसंस्थिताः ॥ दीर्घको-
ष्ठानिकुर्यादष्टसंख्याश्चुचिस्मिते ॥ ३ ॥तन्मध्यो
परिभागेचएकैकंविलिखेत्क्रमात् ॥ मध्येनामाक्षरं
देविद्विवारंतुपुनःपुनः ॥ ४ ॥ तस्याधोधः क्रमेणैव

तेनैवविलिखेत्पुनः ॥ दुर्भगाचेतिरुद्दौलिंगेविधिवच्च पुनःपुनः ॥ ५ ॥ पुनस्तान्येवाक्षराणिकोष्टायाव त्समापिताः ॥ कोष्ठबाह्योपिविलिखेदधोपरिविशेष तः ॥६॥ अजितेत्युपरिसंलेख्यंस्वाहांतंप्रणवादिकं अपराजितेअधोभागेस्वाहांतंप्रणवादिकं ॥ ७ ॥ एवंसंलिख्ययंत्रंतुगच्छेच्चैवसरित्तटे ॥ उभयोः कूलयोर्ग्राह्यामृत्तिकामौनिनाशुभा ॥ ८ ॥ तयागणप तिंकृत्वायंत्रंतस्योपरिक्षिपेत् ॥ गोदुग्धस्नपनंकु र्याद्गणनाथस्यसुंदरि ॥ ९ ॥ अर्चयेद्विविधैःपुष्पैर्मो दकैर्बहुभिस्तुत ॥ संपूज्यबालकांश्चस्यैर्गणेशःप्रीय




तामिति ॥ १०॥ एवंसंपूज्यदेवेशंगणराजंस्शुचि
स्मिते ॥ शरावसंपुटेक्षिप्त्वासंपुटोपरिविन्यसेत्
॥ ११॥ अघोरेतिअघोरेतिविलिखेत्संपुटोपरि ॥
भूमिस्थंसम्पुटंकुर्यान्निखन्यादथपूजयेत् ॥ १२॥
दौर्भाग्यमतुलंप्राप्यनारीसीदत्यहर्निशं ॥ पुरुषो
नसहेतांतुसुरूपामपिसुव्रते ॥१३॥ पुल्लिंगेयो
जितंयंत्रंनारीनसहतेतुतं ॥ दंपत्योर्द्वेषणंदेविरह
स्यंपरमंसदा ॥ १४॥ नान्यत्रसंप्रयोक्तव्यंयंत्रमेनं
ममप्रियं ॥ नदेयंयस्यकस्यापिविपरीतंप्रजायते
॥१५॥ ॥ इतिश्रीयंत्रचिं०ना॰म॰प्र॰उ॰ष॰विद्वे
षणाधिकारे दा० नरनारीविद्वेषणनामप्रथमंयंत्रम्॥
॥१॥ ॥श्रीशिवउवाच॥ ॥अतःपरंप्रव-
क्ष्यामिशत्रुविद्वेषणंपरम् ॥ परस्परंमहाद्वेष्यंशत्रू-
णांजायतेपरं ॥१॥ विद्वेषिरक्तयुक्तेनलेखन्याका
कपिच्छया ॥ श्मशानकर्पटेलेख्यंचतुर्दश्यांवरान
ने ॥२॥ ह्रींकारंचअकारंचबिंदुयुक्तंततःपरं ॥
ह्रींकारंचतृतीयंवैएकपंक्तौलिखेद्बुधः ॥ ३ ॥अधः
पंक्तौततोनामवर्तुलंवेष्टयेत्ततः ॥ चतुर्दलं ततः

कुर्याद्रेखाद्वितयभूषितम् ॥ ४ ॥ दलमध्येतथाले-
ख्यंमध्यदेशेतथैवच ॥ अजारक्तेनसंमिश्रंभक्तंनैवे
द्यकंभवेत् ॥ ५ ॥ बलिपुष्पैःप्रपूज्याथ यंत्रंरात्रौवरा
नने ॥ योगिनींभोजयेच्चैकांगुरुंसंपूज्ययत्नतः ॥ ६ ॥
उद्वासेशिवगेहेतुस्थाप्यंयंत्रंनसंशयः ॥ श्मशानेप्य
थवा स्थाप्यंगृहेनैवकदाचन ॥ ७ ॥ शत्रूणांजायते




द्वेषःक्रमेणैवनसंशयः ॥ स्वशत्रुद्वेषणंनामयंत्रंरा
जंमहाफलं ॥ ८ ॥ एकांतेस्मरणीयंच लोकांतेनक


दाचन ॥ ९ ॥ इ॰यं॰चिं॰ना॰म॰प्र॰उ॰ष॰वि॰दा॰शत्रुवि द्वेषणंनामद्वितीययंत्रम् ॥ २ ॥ श्रीशिवउवाच ॥ अतःपरंप्रवक्ष्यामिबंधुविद्वेषणंपरं ॥ श्मशानकर्पटे लेख्यंलेखन्याकाकपिच्छया ॥ १ ॥ मेषस्यरुधिरे णैवधृष्ट्वांगारंश्मशानकं ॥ साध्यनामलिखित्वातु त्रिकोणंवेष्टयेत्ततः ॥ २ ॥ अधोपरिचरेफोच संले- ख्यौभूतरात्रिषु ॥ ततस्तद्वेष्टयेत्सम्यक्चतुःकोणं तुरेखया ॥ ३ ॥ कोणेकोणेत्रिशूलानांसंलेख्यंच चतुष्टयं ॥ चतुर्दिक्संमुखंलेख्यंचतूरेफोपरिस्थितं



॥ ४ ॥ एवंसंलिख्ययंत्रंतुसंपूज्यंपूर्ववत्पुनः ॥ सप्तांगुलंनिखन्यातुपूरयेद्भूमिमध्यतः ॥ ५ ॥ यत्रास्ति तेषांनार्गश्चितत्रैवप्रक्षिपेत्ततः ॥ परस्परंमहाद्वेषंबंधूनांसंप्रजायते ॥ ६ ॥ यस्यपादःपतत्यत्रसोपिदौर्भाग्यभाजनः ॥ जायतेनात्रसंदेहोयंत्रराजप्रसादतः ॥ ७ ॥ इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ ष॰ वि॰ दा॰ बंधुविद्वेषणंनाम तृतीयंयंत्रम् ॥ ३ ॥ श्रीशिवउवाच ॥ ॥ अतःपरं प्रवक्ष्यामिविद्वेषंस्वामिभृत्ययोः ॥ विषेणरक्तमिश्रे पालेखन्याकाकपिच्छया ॥ १ ॥ श्मशानकर्पटेलेख्यंचतुर्दश्यांमहानिशि ॥ साध्यनामाख्यगर्भेतुवर्तुलंवेष्टयेत्ततः ॥ २ ॥ तस्योपरिअधोभागेरकारत्रितयंपुनः ॥ यकारसंपुटेलेख्यंतिर्यग्भागेद्विबीजकम् ॥ ३ ॥ यकारंचसकारंचविसर्गान्तंप्रतिष्ठितं ॥ एवंसंलिख्ययंत्रंतुवर्तुलं वेष्टयेत्ततः ॥ ४ ॥ एवंसंलिख्ययंत्रंतुतेषां




मार्गे निखन्यतु ॥ संजायते महाद्वेषः स्वामिसेवकयोः सदा ॥ ५ ॥ यावद्यंत्रंतु भूमिस्थं तावद्द्वेषः प्रजायते ॥ ७ ॥ ॥ इ. यं. चिं. ना. म. श्र. उ. प. वि. दा. स्वामिभृत्ययोर्विद्वेषणं नाम चतुर्थं यंत्रम् ॥ ४ ॥ ॥ ॥ श्रीशिवउवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि जगद्द्वेषणाकं परम् ॥ यंत्रं भयानकं नाम दौर्भाग्यस्य विवर्धनम् ॥ १ ॥ काकोलूकस्य रक्तेन कुक्कुरस्यैव वा पुनः ॥ दौर्भाग्यलक्षणायाश्च लेखन्या काकपिच्छया ॥ २ ॥ विलिखेद्भूर्जपत्रे तु साध्यनाम निशि प्रिये ॥




कृष्णाष्टम्यां चतुर्दश्यां लिखेद्यंत्रं मनोहरम् ॥ ३ साध्यनाम लिखेन्मध्ये ठकारपरिवेष्टितं ॥ ठकाराणां न संख्यास्ति विषमैर्वेष्टयेत्सदा ॥ ४ ॥ ततस्तु वर्तुलं वेष्ट्यं दुर्भगोभव वेष्टयेत् ॥ एतद्यंत्रं तु संस्थाप्य तद्गृहे तृणमध्यतः ॥ ५ ॥ यावद्गृहस्थं तद्यंत्रं सोपि तद्गृहतः सदा

॥ तावद्विश्वस्यशत्रुः स्यान्नात्रकार्याविचारणा ॥
६॥ पूजाक्रमस्तु पूर्वोक्तोयंत्रेदेविनृणांसदा ॥ ७ ॥
इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ ष॰ पी॰ दा॰ विद्वेषणाधिकारे विश्व
विद्वेषणंनामपंचमंयंत्रम् ॥ ५ ॥ ॥
चिंतामणौयंत्रवरेसुकल्पेश्रीचन्द्रचूडस्यमुखाद्विनिर्गते
॥ तस्मिंश्चतुर्थेतुमहाधिकारेपूर्णातुपीठीकथिताऽत्रष
ष्ठी ॥ १ ॥ पंचैवयंत्राणिमहाधिकारेचकारदामोदरविप्र
वर्यः ॥ रहस्यभूतानिविचार्यलोकेश्रृण्वंतियेतेसुखिनः
सदानराः ॥ २ ॥ इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पे
प्र॰ सि॰ उ॰ सं॰ दामोदरपंडितोद्धृतेषष्ठीपीठिकायुतोविद्वे
षणाऽधिकारःसमाप्तः ॥ ॥ अथमारणाधिकारः ॥
ब्रह्मांडंसर्वमेतत्प्रचलितबहुविधंयः सदाभूतजालंसस्ता
त्सर्वस्यदेवैः करकलितमहाकालदंडोतिरौद्रः ॥ नत्वा
तंकालसंज्ञंविरचयतिमहापञ्चमंचाधिकारंमृत्योःसं
दर्शनाख्यंप्रकटयतिमहोगंगदत्तस्यसूनुः ॥ १ ॥ संमा
रणोनाममहाधिकारः प्रारभ्यतेसंप्रतिपंचमोमया ॥ सा
संसमीस्यात्किलकल्पवल्लीचिंतामणौश्रीशिवभाषितेऽस्मिन् ॥ २ ॥ ॥ श्रीशिवउवाच ॥ ॥ अतःपरं

प्रवक्ष्यामियंत्रंशत्रोस्तुमारणं ॥ एतद्यंत्रंतुसंलेख्यं कपालेतुनरस्यच ॥ १ ॥ श्मशानांगारकंघृष्य धत्तूरकरसेनतु ॥ श्मशानेचैवसंलेख्यंचतुर्दश्यांमहानिशि ॥ २ ॥ विवस्त्रेणानिःशंकेनएकाकीयंत्रमुत्तमम् ॥ मध्येनामलिखित्वातुलिखेन्म्लम्लितथोपरि ॥ ३ ॥ अधोऽपिम्लम्लिबीजौद्वौविलिख्योसाधकेनतु ॥ त्रिकोणंवेष्टयेत्पश्चाद्रेखाद्वितयशोभितम् ॥ ४ ॥ ऊर्ध्वरेखास्तुकर्तव्याः सर्वत्रापिवरानने ॥ शरावसम्पुटंक्षिप्त्वायंत्रंतंसम्प्रपूजयेत् ॥ ५ ॥ बलिमांसोपहारैस्तु स्वरक्तेनविशेषतः ॥ एतद्यंत्रंतुतत्रैवनिखन्यादथपूरयेत् ॥ ६ ॥ उपरिज्वालयेन्नूनंरात्रौरात्रौशुचिस्मितं ॥ एवंकृतेतृतीयाह्निशत्रोः संजायतेज्वरः ॥ ७ ॥ क्रमेणैवमहाव्याधिस्ततोवैमरणंभवेत् ॥ एकजीवंबलिंदत्वाउद्धृतंजीवतेहिसः ॥ ८ ॥ नोचेद्यमपुरंयातिनाऽत्रकार्याविचारणा ॥ ९ ॥ इति




श्रीयं·चिं·ना·म·उ·सं·सप्तमपीठिकायांमारणाधिकारे
दाः शत्रुमारणंनामप्रथमंयंत्रम् ॥ १ ॥ श्रीशिवउ०॥
अथातःसंप्रवक्ष्यामियंत्रंशत्रुप्रणाशनं ॥ मारणंप्र
बलस्यापिशत्रोर्मृत्युर्नचान्यथा ॥ १ ॥ विषेणहरि-
तालेनभूर्जपत्रेलिखेन्नरः ॥ साध्यनामलिखित्वा
तुलेखन्याकाकपिच्छया ॥ २ ॥ लेखनेतुविधिःपूर्व
सुक्तोयोमारणेहिसः ॥ वारंवारंकिमुक्तेनग्रंथवि-
स्तारकारणम् ॥ ३ ॥ ह्रींकारगर्भमध्येतुसाध्यनाम
प्रतिष्ठितं ॥ ततस्तद्वेष्टयेत्सम्यक्त्रिकोणंपूर्ववत्पुनः॥
४ ॥ कोणेकोणेत्रिशूलंचविलिख्याऽथप्रपूजयेत् ॥




पूजनेविधिराद्योक्तःस-
र्वत्राऽपिचमारणे ॥ ५॥
नरांघ्रिनलिकामध्येक्षि
पेद्यंत्रंसुपूजितम् ॥ खा
त्वाश्मशानभूमिस्थान
लिकातुसुयंत्रिका ॥ ६
॥ अकस्मान्मरणंतस्य
जायतेनाऽत्रसंशयः ॥


अनुग्रहस्तु पूर्वोक्तः सर्वत्राऽपिचमारणे ॥ ७ ॥ ॥
इतियं. ना. शत्रुमारणंनामद्वितीयंयंत्रम् ॥ २ ॥
॥ ॥श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्यामि
मारणंदूरदेशजं ॥ श्मशानांगारकंघृष्य अजारक्तं
तथैवच ॥ १ ॥ विषंचैवतुसंघृष्यलिखेन्नरकपालके
॥सम्पुटंचैवसंलेख्यंलेखन्याकाकपिच्छया ॥ २ ॥
साध्यनामलिखेन्मध्येहुंकारपुटितंशुभं ॥ ततश्चाष्ट



दलंकृत्वाग्रहसंस्थापनेयथा ॥ ३ ॥ चतुर्दलंतुसंलि-
ख्यहुंफट्तुदलमध्यतः ॥ ततस्तुवेष्टयेत्सम्यग्वर्तुलं
तुद्विरेखया ॥ ४ ॥ हुंकारैर्वेष्टयेत्सम्यग्विषमैः सर्वतः
प्रिये ॥ ततस्तत्सम्पुटम्मेल्यभस्मनापूरयेच्छुभे ॥ ५ ॥
अग्नेरुपरिसंस्थाप्यपूरयित्वायथोदितम् ॥ देशांतर
गतस्यापिशत्रोः संजायतेज्वरः ॥ ६ ॥ प्रत्यहंज्वालनी
यंतुस्तोकंस्तोकंतुसुंदरि ॥ दिनेएकाधिकेविंशे सर्वत-
ज्ज्वलयेन्निशि ॥ ७ ॥ तस्मिन्नेवक्षणेशत्रोर्मरणंजा
यतेप्रिये ॥ अनुग्रहेतुपूर्वोक्तं विधानमितिनिश्चितं ॥
८ ॥ इ. यं. चिं. ता. म. प्र. सि. उ. सं. मा. दा. देशांतरस्य
शत्रुमारणंनाम तृतीययंत्रम् ॥ ३ ॥ श्रीशिवउवाच ॥
॥ अतःपरंप्रवक्ष्यामिमारणंसर्वदेहिनाम् ॥ रुधिरेण
मनुष्यस्यश्मशानांगारघर्षणैः ॥ १ ॥ विषेणचतथा
लेख्यंकर्पटेवैश्मशानके ॥ साध्यनामलिखित्वातुहुं-
फट्संपुटितंतथा ॥ २ ॥ एवंत्रिवारंसंलिख्यत्रिपंक्तौ
तुवरानने ॥ ततस्तद्वेष्टयेत्सम्यग्वर्तुलंतुत्रिरेखया ॥
३ ॥ राजिकाप्रतिमांकुर्याच्छत्रोश्चरणपांसुना ॥
हृन्मध्येयंत्रकंक्षिप्त्वा शत्रोस्ताप्यातुपुत्तली ॥ ४ ॥



शत्रोःक्रमःक्रमेणैवदाहशोष
स्तुजायते ॥ शिरोव्यथाच
महतीतृतीयेऽह्निप्रजायते
॥ ५ ॥ हस्तपादांगदाहः
स्यान्मरणंसप्तमेदिने ॥
जायतेनात्रसंदेहोविधाव-
पिनसंशयः ॥ ६ ॥ इ॰ यं॰ चिं॰
ना॰ म॰ प्र॰ उ॰ सं॰ मा॰ दा॰ शत्रुनाशनंनामचतुर्थयंत्रम् ४
श्रीशिवउ॰॥ ॥ अथातःसंप्रवक्ष्यामियंत्रंस्त्रीपुंसमा
रणम् ॥ बिभीतकस्यपत्रेतुश्मशानभस्मनालिखे-
त् ॥ १ ॥ ऋतुरक्तेनसम्मिश्रंलेखन्याकाकपिच्छ-
या ॥ साध्यनामलिखेन्मध्येस्तंभस्तंभेतिसम्पुट
म् ॥ २ ॥ ततस्त्रिकोणंसंवेष्ट्य पञ्चकोणंतथोप-
रि ॥ मनुष्यनलिकेक्षिप्त्वानलिकाम्पूर्यमृत्स्नया
॥ ३ ॥ तन्मूत्रसिक्तयादेवितनस्तत्पूर्यपूरयेत् ॥
भूमध्येतुखनित्वाथश्मशानेप्रयतोनिशि ॥ ४ ॥
ततःसंजायतेरोधोरिपोर्मूत्रस्यवैक्षणात् ॥ म्रिय
तेसप्तरात्रेणमोक्षःपूर्वोक्तमार्गतः ॥ ५ ॥ ॥



इतिश्रीयंत्रचिं· ना·म·प्र·सि· उ·सं· सप्तमीपीठिका-
यांमारणाधिकारेदा· नरनारीमारणं नामपंचमंयंत्रं ॥
॥५॥ ॥चिन्तामणौकल्पवरेसुयंत्रेश्रीचंद्रचूडस्य-
मुखाद्विनिर्गते ॥ नाम्नामहामारणसंज्ञकेतुसंपूर्णतां
सप्तमिपीठिकागता ॥१॥ पंचैवयंत्राणिमहाधिकारे
सम्मारणेपंचमकेतिरौद्रे ॥ संसारमूलानिसुकीर्ति-

तानिमयैवदेविपुरतःस्फुटानि ॥ २ ॥ इ०यं०चिंताम०
ना०म०प्र०उ०सं०दा०सप्तमिपीठिकायुतोमारणाधिका-
रः समाप्तः ॥ ॥ अथोच्चाटनाधिकारः ॥ ॥
देवाधिदेवस्यसदाशिवस्यत्रैलोक्यवंद्यस्यपदारविंदं
॥ कायेनवाचामनसाचनत्वादामोदरोभार्गववंशजा
तः ॥ १ ॥ प्रवक्ष्यतेसंप्रतिषष्ठसंज्ञमुच्चाटनंनाममहा
धिकारम् ॥ यंत्राणिबीजानिपरिस्फुटानिशिवाज्ञया
लोकहितायधिमः ॥ २ ॥ ॥ श्रीशिवउवाच ॥ ॥
अतःपरंप्रवक्ष्यामिशत्रोरुच्चाटनंपरम् ॥ अनामिक
यारक्तेनभूर्जपत्रेवरानने ॥ १ ॥ गंगणपतिबीजानि-
प्रहितंप्रणवादिकं ॥ एकपंक्तौसमालेख्यंहुंगंनामवि
लिख्यच ॥ २ ॥ पंक्तौद्वितीयेसंलेख्यतृतीयेविलि
खेत्ततः ॥ हुंगंधस्वांगहेति लिखित्वाक्रमतोनरः ॥
३ ॥ ततस्तद्दूषयेत्सम्यक्चतुःकोणंद्विरेखया ॥ र
क्तांबरधरादेविरक्तमाल्यानुलेपनः ॥ ४ ॥ चतुर्द-
श्यांसाधकस्तुमहारात्रौलिखेत्क्रमात् ॥ पूजनंरक्त
कुसुमैरक्तगन्धैःफलैःशुभैः ॥ ५ ॥ कुमारभोजनंरा
त्रौयथाशक्त्यातुदक्षिणाम् ॥ ध्यानंतुदेवदेवस्यग-

णनाथस्यसुंदरि ॥ ६ ॥ श्रीलांजनाभंगजवल्कवर्यश्चा त्रंगृहीत्वानिजपुष्करेण ॥ उच्चालयंतंगगनंगणेशंध्या त्वातुनित्यंविधिवन्मनुष्यः ॥ ७ ॥ उच्चाटयेद्वनसं शयोऽस्तिदिनैस्तथैकाधिकविंशकेन ॥ अयंक्रमो

लेखनपूजनेच सर्वत्रउच्चाट कृताधिकारे ॥ ८ ॥ खंड कृत्वातुतद्यंत्रमुच्छिष्टोन्न माश्रितम् ॥ दीयतेभक्ष णार्थंचवायसेभ्योंतिमेदि ने ॥ ९ ॥ इ· चिं· ना· म· क· क्र· सि· उ· सं· अष्टम पीठे

ॐ गं गणपति प्रहितं
हुं गं देवदत्तः
हुं गं धं स्वां ग हा

कक्ष्यामुच्चाटनाधिकारे दा· शत्रूच्चाटननामप्रथमंयंत्रं॥ ॥१॥ ॥श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्या मिसद्यउच्चाटनंपरम् ॥ विषेणतालकेनैवगोदंतहरि तालके ॥ १ ॥ चित्रकस्यरसेनैवलिखेत्काकंतुकर्पटे ॥ श्मशानजेतुलेखन्याकाकपिच्छसमुद्भवा ॥ २ ॥ साध्यनामलिखेत्पश्चाद्धायसोदरमध्यतः ॥ पूजनेले खनेचैवपूर्वोक्तस्तुविधिःस्मृतः ॥ ३ ॥ अधोमुखंतु


न्त्काकं लम्बमानंतुदक्षिणे ॥ बिभीतकस्यवृक्षेतु
बंधयेत्प्रयतोनिशि ॥ ४ ॥ एवंकृतेतृतीयेह्निस्था-




नादुच्चाटनंभवेत् ॥ यावद्यं
त्रंतुतत्रस्थमुद्विग्नस्ताक-
देवहि ॥ ५ ॥ नरोचतेगृहं
तस्यसुखंनलभते क्वचित्
॥ विदेशगमनंतस्यसंशये
नचजीवितम् ॥ ६ ॥ ॥

इतियं॰चिं॰ना॰म॰प्र॰उ॰म॰सं॰ अ॰उ॰ सद्योच्चाटनकरं
नामद्वितीययंत्रम् ॥ २ ॥ श्रीशिवउवाच ॥ ॥

अथातः संप्रवक्ष्यामिउच्चाटंसर्वदेहिनां ॥ काकोलू-
कस्यरक्तेनभूर्जपत्रेलिखेन्नरः ॥ १ ॥ मध्येनामलिखि-
त्वातुवर्तुलंवेष्टयेत्ततः ॥ चतुर्दलंततः कुर्याद्रेखाद्वित
यशोभितम् ॥ २ ॥ यकारदलमध्येतुविसर्गांतंप्रतिष्ठि
तम् ॥ पूजाक्रमस्तुपूर्वोक्तोध्यानंदेवविसर्जनं ॥ ३ ॥
खंडंकृत्वातुतद्यंत्रमुच्छिष्टोदनभिश्रितम् ॥ दीयते
भक्षणार्थंचवायसेभ्योतिमेदिने ॥ ४ ॥ दिशांसंत्य-
ज्ययात्येवग्रामस्यैवतुकाकथा ॥ ५ ॥ ॥




इतिश्रीयं· चिं· ना· प्र· उ· अ· उ· दा· सर्वजनोच्चाटनंनामतृतीयंयंत्रम् ॥ ३ ॥ ॥ श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्यामिशत्रोरुच्चाटनंपरं ॥ निंबपत्ररसैर्लेख्यंलेखन्याकाकपिच्छया ॥ १ ॥ भूर्जपत्रोपरिक्षिप्तंविधिः पूर्वोक्तएवहि ॥मध्येनामलिखित्वातुवर्तुलंवेष्टयेत्ततः ॥ २ ॥ चतुर्दलंततः कुर्याद्बीजयुक्तंमनोहरम् ॥ रथोहइतिबीजानिदलमध्येपृथक्पृथक् ॥ ३ ॥ संपूज्यपूर्ववत्पश्चान्निखन्यादग्यपूरयेत् ॥अधोमुखंतुतद्यंत्रंपूर्वोक्तविधिनाततः ॥ ४ ॥




एवंकृतेससमोह्निउच्चाटय तिनान्यथा ॥ भ्रमेद्देशावि देशेचतृणवत्परिभूयते ॥ ५ ॥ इतियंत्रचिंताम॰ना॰ स॰म॰उ॰अ॰उ॰शत्रोरुच्चा टनंनामचतुर्थयंत्रम् ॥ ॥४॥

॥ श्रीशिवउवाच ॥ शृणुदेविप्रवक्ष्यामियंत्रमुच्चाटनं स्त्रियः ॥ गर्दभस्यतुरक्तेन लेखन्याकाकपिच्छया ॥




१ ॥ फलकेचलिखित्वातु वर्तुलंवेष्टयेत्ततः ॥ तत-श्चाऽष्टदलंकुर्याद्बीजयुक्तं मनोहरं ॥ २ ॥ खकारंस विसर्गांतं ह्रींकारंतदनंतरं ॥ एवंयंत्रंतुसंलिख्यपूज यित्वाविधानतः ॥ ३ ॥ निखन्यभूमौसंपूर्यपूर्वव-च्चाप्यधोमुखं ॥ कृतंह्येवंतृतीयेह्नि शत्रावुच्चाटनंभवेत् ४

उच्चाटयतिस्थानात्तुचलतेवायुपर्णवत् ॥ ५ ॥ ॥
इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ सं॰ अ॰ उ॰ स्त्रीणांसद्यउच्चाटनं
नामपंचमंयंत्रम् ॥ ५ ॥ ॥ श्रीशिवउवाच ॥ ॥
शृणुदेविप्रवक्ष्यामित्रैलोक्योच्चाटनंपरं ॥ कृष्णकुक्कु
टरक्तेनभूर्जपत्रेलिखेन्नरः ॥ १ ॥ साध्यनामालिखि
त्वातुत्रिकोणंवेष्टयेत्ततः ॥ पुनःत्रिकोणंसंलिख्यद्वि
तीयंतुवरानने ॥ २ ॥ ततोपरिविभागेचह्रींकाराणां
चतुष्टयम् ॥ एतत्त्रिभागेसंलिख्यबीजानिरविसं-
ख्यया ॥ ३ ॥ परितोवर्तुलंकृत्वापूजयेत्पूर्ववत्पुनः ॥



एवंकृत्वातुतद्यंत्रंब-
ध्नीयाच्चभुजेगले ॥
४ ॥ यथायथाभ्यसेज्ज
तितथासोऽपिक्षणेन
हि ॥ उच्चाटयेन्नसंदेह
स्तत्क्षणात्सुरसुंदरि ॥
॥ ५ ॥ ॥ इ॰ यं॰ चिं॰ ना॰
म॰ प्र॰ उ॰ अ॰ उ॰ दा॰ त्रै॰
लोक्योच्चाटनंनामषष्ठंयंत्रम् ॥ ६ ॥ ॥

॥ श्रीशिव उ० ॥ अथातः संप्रवक्ष्यामियंत्रमुच्चाटनंपरं ॥
निशाचररसैलेख्यंभूर्जपत्रेनसंशयः ॥ १ ॥ साध्यना
मलिखित्वातुवर्तुलंवेष्टयेत्ततः ॥ उपर्यष्टदलंकृत्वाबी-
जयुक्तंमनोहरं ॥ २ ॥ ततश्चलेख्यंफडितिप्रत्येकंदल



मध्यतः ॥ ततस्तद्वेष्टयेत्स
म्यग्वर्तुलरेखयैकया ॥ ३ ॥
संपूज्यविधिवत्पश्चाद्यंत्रं-
संचूर्णयेत्ततः ॥ स्थानेपा-
नेचदातव्यमुच्चाटोजायते
ध्रुवं ॥ ४ ॥ हरिद्रातरुधिरल्या
तागुप्तनामानिशाचरः ॥

॥ ५ ॥ इ॰ यं॰ चिं॰ ना॰ म॰ प्र॰ उ॰ अ॰ उ॰ दा॰ परमोच्चाटनंना-
मसप्तमंयंत्रं ॥ ७ ॥ चिंतामणौयंत्रवरेसुकल्पेश्रीचंद्र
चूडस्यमुखाद्विनिर्गते ॥ उच्चाटनंनाममहाधिकारेप्रका-
शिताष्टमपीठिकेयं ॥ १ ॥ सप्तैवयंत्राणिमहाधिकारे
उच्चाटनेश्रीशिवभाषितेस्मिन् ॥ रहस्यभूतानितुकीर्ति
तानिविप्रेणदामोदरसंज्ञकेन ॥ २ ॥ इतियं॰ ना॰ म॰ क॰
प्र॰ उ॰ दा॰ अ॰ पीठिकायुतोच्चाटनाधिकारः समाप्तः ॥ ॥


॥ अथशांत्याधिकारः॥ यःपूर्वंजनकादेशादरण्यंसमपद्य
त्‌ ॥ निस्तीर्थप्राप्तवान्सीतांतंरामंप्रणतोऽस्म्यहं ॥१॥
अधिकारंमहद्वक्ष्येसर्वोपद्रवनाशनं ॥ नवम्यांपीठिका-
यांतुशांतिपुष्टिकरंपरं ॥२॥ शांतरक्षाकरंनामख्यातंस
र्वत्रदुर्लभं॥ नदेयंयस्यकस्यापियदीच्छेत्सिद्धिमात्म
नः ॥३॥ नारीणांमनुजेषुशांतिककरात्रक्षाकरान्सर्व
दाबालानांचतथैवसर्वसुखदामंत्राणियंत्राणिते ॥
तान्ध्योद्धृत्यमहागमाद्यविविधान्गंगाधरस्यात्मजोनि-
त्यकृष्णमतिः प्रवक्ष्यातिमहादामोदरः सांप्रतं ॥ ४ ॥
श्रीशिवउ०॥ शृणुदेविपरंगुह्यंयंत्रंरक्षाकरंपरं॥ बाल
स्त्रीपुरुषाणांचमहारक्षाकरंस्मृतं ॥ १॥ कांस्यपात्रे
तुसंलेख्यंसुतिथौशोभनेदिने॥ रोचनाकुंकुमेनैवक
र्पूरेणाविशेषतः ॥ २ ॥ मृगनाभिसमायुक्तंजातीकाष्ठे-
नसंलिखेत्‌ ॥ ऊर्ध्वमष्टाभिरेखाभिस्तिर्यग्रेखास्तथैव
च ॥ ३ ॥ एवमेकोनपंचाशत्कोष्ठाश्चभवंतिहि ॥ ई-
शानादिक्रमेणैवस्वराः कोष्ठेनसंलिखेत्‌ ॥ ४ ॥ तेनै-
वक्रमतोलेख्याः शेषकोष्ठेषुव्यंजनाः ॥ एवंसंलि-
ख्यबीजानित्रिशूलानिलिखेत्ततः ॥ ५ ॥ त्रिनिरेखो

परिनूनंचतुर्दिक्षुक्रमाल्लिखेत् ॥ क्रोंकाराः सप्तसं
लेख्याः पूर्वपंक्तोत्तुपश्चिमे ॥ ६ ॥ एवंसंलिख्यतद्यं
त्रंपूजयेद्भक्तिभावतः ॥ पुंडरीकैः सितांभोजैः शतप-
त्रैर्मनोहरैः ॥ ७ ॥ मालतीयूथिकाभिश्चकेतकैर्मल्लि
कैस्तथा ॥ बकुलैश्चयथालाभंफलैः कालोद्भवैःशु
भैः ॥ ८ ॥ निर्गंधंरक्तवर्णंचपुष्पंयत्नेनवर्जयेत् ॥
सकर्पूरैश्चतांबूलैर्धूपैर्दीपैः सितांबरैः ॥ ९ ॥ दिनत्र
यंतुसम्पूज्यनैवेद्यैर्विविधैःप्रिये ॥ जपेत्सप्तशतीनि
त्यंब्राह्मणांस्तुदिनत्रयम् ॥ १० ॥ संभोज्यपायसेनैव
यथेष्टेनघृतेनतु ॥ त्रिदिनंभूमिशायीस्याद्भोजनाद्रध-
रोचनां ॥ ११ ॥ उद्धृत्यगुटिकांकुर्यात्त्रिलोहैर्वेष्टयेत्त
तः ॥ तच्छेषंचैवपातव्यंपानीयेन वरानने ॥ १२ ॥
परस्यजायते क्षोभोविद्ययावैनियोजितः ॥ गुटिकां
धारयेद्देविबाहुमूलेगलेऽथवा ॥ १३ ॥ धारणात्तस्य
यंत्रस्यउपसर्गः प्रशाम्यति ॥ अलक्ष्मीःकलहश्चैव
दौर्भाग्यंचविशेषतः ॥ १४ ॥ यत्परेणकृतंकिंचित्तत्स
र्वंचप्रणश्यति ॥ शांतिकंपौष्टिकंनामदेवानामपिदुर्ल
भं ॥ १५ ॥ प्रथमंयंत्रराजाख्यंसद्यः प्रत्ययकारकं ॥


क्रौं	क्रौं	क्रौं	क्रौं	क्रौं	क्रौं	क्रौं
अं	आं	इं	ईं	उं	ऊं	ऋं
जं	झं	ञं	टं	ठं	डं	ॠं
छं	भं	मं	यं	रं	ढं	ऌं
चं	बं	सं	हं	ळं	णं	ॡं
ङं	फं	षं	शं	वं	तं	एं
घं	पं	नं	धं	दं	थं	ऐं
गं	खं	कं	अः	अं	औं	ओं
क्रौं	क्रौं	क्रौं	क्रौं	क्रौं	क्रौं	क्रौं

इतिश्रीयं॰चिं॰ना॰म॰प्र॰उ॰नवमपीठिकायांशांत्यधिका
रेदा॰शांतिकंपौष्टिकंनामप्र॰यं॰ ॥ १ ॥ श्रीशिवउ॰ ॥
शृणुदेविप्रवक्ष्यामियंत्रमरिनिवारणं ॥ सर्पव्याघ्रभयं
नास्तियंत्रंकरतलेस्थिते ॥ १ ॥ लेखनेविधिपूर्वोक्तांद्र
व्यंपूर्वोक्तमेवच ॥ सर्वत्रशांतिकेदेविविधिरन्योनविद्य
ते ॥ २ ॥ पूजनंचापिपूर्वोक्तंनियमश्चाऽपितादृशः ॥
भूर्जपत्रेतुसंलेख्यंद्वितीयंयंत्रमुत्तमं ॥ ३ ॥ ह्रींकारग-


र्भमध्येतुसाध्यनामलिखेन्नरः ॥ तत्तत्पादेतुसंयोज्यं मकारंतदनंतरं ॥ ४ ॥ लकारंचवकारंचयकारान्तंप्रतिष्ठितं ॥ ऊकारस्वरसंयुक्तंशांतिबीजंमनोहरं ॥ ५ ॥




ततस्तद्वेष्टयेत्सम्यक्चतुःकोणंहिरेखया ॥ त्रिलोहवेष्टितंकृत्वाबाहुमूलेगलेऽथवा ॥ ६ ॥ सर्पव्याघ्रभयंहंतिहंतिचोरभयंतथा ॥ विविधोपद्रवंहंतिनाऽत्रकार्याविचारणा ॥ ७ ॥ इतियंचिं.ना.म.प्र.उ.न.शां.दा.सर्पव्याघ्रचोरभयनाशनंनामद्वितीयंयंत्रं ॥ २ ॥ ॥ श्रीशिवउ० ॥ ॥ शृणुदेविप्रवक्ष्यामियंत्रंदौर्भाग्यनाशनं ॥ नारीणांचविशेषेणनराणांचैवसर्वदा ॥ १ ॥ लेखनेतुविधिःप्रोक्तोद्रव्यंपूर्वोक्तमेवच ॥ लेखनीपूर्वनिर्दिष्टाभूर्जपत्रेलिखेन्नरः ॥ २ ॥ साध्यनामलिखित्वातुत्रिकोणंतुद्विरेखया ॥ तस्योपरिचतुःकोणंरेखाद्वितयशोभितं ॥ ३ ॥ कोणेकोणेत्रिशूलेतुपूर्वोक्तविधिनाततः ॥ त्रिलोहवेष्टितंकृत्वा



बाहुमूलेगलेऽथवा ॥ ४॥ धारयेद्विधिवत्पूर्वेनारीवा पुरुषोथवा ॥ विविधोपद्र वहंतिवंध्यागर्भवतीभवेत् ॥ ५॥ सौभाग्यमतुलंप्राप्य देववन्मोदतेसदा ॥ ६॥ इतिश्रीयंत्रचिं·ना·म·प्र·उ· नवमपी·शां·दा· सौभाग्यजननंवंध्यागर्भधारणंनाम तृतीययंत्रं ॥ ३॥ ॥श्रीशिव उ०॥ ॥अथातःसंप्रव क्ष्यामिज्वरनिर्नाशनंपरं ॥ भूतजंतुज्वरंहंतिविद्यते वैद्यकोदितं ॥ १॥ बालानांतुसदाकार्ययंत्रंवैज्वर-शांतये ॥ उन्मत्तस्यरसेलेख्यंकर्पटेवैश्मशानके ॥ २॥ कृष्णाष्टम्यांचतुर्दश्यांसंपूज्यनिरवनेत्तमः ॥श्म-शानेतुदिवेवस्यान्निराहारेणमानवः ॥ ३॥ चतुःको णोपरिचतुर्भवेदुष्टदलंतथा ॥ मध्येनामलिखित्वा-तुरकारस्यतुसंपुटे ॥ ४ ॥ दलमध्येंतरालेतुरकारंसं प्रतिष्ठितं ॥ एवंविंशतिरेफाःस्युःसर्वतत्रक्रमेणतु॥ ५॥ संपूर्यभूमौसंपूज्यवलिपुष्पैर्मनोहरैः ॥ तत्क्ष-




णाद्यातिभूतंतुज्वररूपं
तुदारुणम् ॥ ६ ॥ इतियं
चिंतामणिना-म-प्र-उ-सं-
न-पी- शां- ज्वरनाशनंना
मचतुर्थयंत्रम् ॥ ४ ॥
॥ श्रीशिवउ० ॥ ॥ अथा
नः संप्रवक्ष्यामिबालानांशांतिकारकं ॥ यंत्रंरक्षाकरं
श्रेष्ठंसर्वोपद्रवनाशनं ॥ १ ॥ पूर्वोक्तविधिनालेख्यंद्र
व्यैः पूर्वोदितैः क्रमात् ॥ भूर्जपत्रोपरिदेविपूर्वोक्तविधि
नार्चनम् ॥ २ ॥ मध्येनामलिखित्वातुवर्तुलंवेष्टयेत्ततः
॥ ततश्चाष्टदलंकुर्याद्बीजयुक्तंमनोहरं ॥ ३ ॥ सकारा




न्सविसर्गान्तान्दलेप्रत्येक
शोन्यसेत् ॥ संपूज्यावि
धिवत्पश्चाद्बाहुमूलेगलेऽ
थवा ॥ ४ ॥ धारयेद्यंत्ररा
जंतुलोहत्रितयवेष्टितं ॥
शाकिन्योवाऽथडाकिन्यो
बालग्रहास्तथापरे ॥ ५ ॥

गच्छंतिबालकंमुक्तायंत्रराजस्यधारणात् ॥ ६॥ इति श्रीयं॰चिं॰ना॰म॰प्र॰सि॰उ॰म॰शां॰दा॰बालरक्षाकरंनाम पंचमंयंत्रं ॥५॥ ॥श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्यामितृतीयज्वरनाशनं ॥ पूर्वोक्तविधिनाले- ख्यंभूर्जपत्रेसुशोभने ॥ १ ॥ साध्यनामलिखित्वातुय कारस्यतुसम्पुटे ॥ त्रिकोणंवेष्टयित्वातुन्यसेद्बीजानि चोपरि ॥ २॥ एवंसं लिख्यसंपूज्यचश्री याद्दक्षिणेकरे ॥ य- काराःसविसर्गान्ताः श्चत्वारश्चपृथक्पृथ क् ॥ ३॥ त्रिषुभागेषु संलेख्यास्त्रिकोणेतु तथोपरि ॥ ज्वरवेला सुनरकार्यंवल्यर्थंद- धिभक्तकम् ॥ ४॥ बालोवाअथवावृद्धोज्वरान्मुच्ये ततक्षणात् ॥ ५॥ इतिश्रीयं॰चिं॰ना॰म॰प्र॰उ॰न॰शां दा॰पं॰से तृतीयज्वरनाशनंनामषष्ठंयंत्रम् ॥ ६ ॥ ॥




श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्यामिवेला ज्वरविनाशनम् ॥ पूर्वोक्तविधिनालेख्यंद्रव्यैःपूर्वोदितैःक्रमात् ॥ १ ॥ भूर्जपत्रेतुसंलेख्यंपूजयित्वाविधानतः ॥ मध्येनामलिखित्वातु वर्तुलंवेष्टयेत्ततः ॥ २ ॥ ऊर्ध्वाऽधोह्यग्रतःपृष्ठे वकारस्यतुसंपुटम् ॥ ततश्चाष्टदलंकुर्याद्बीजयुक्तंतुसर्वतः ॥ ३ ॥ प्रत्येकदलमध्येतु नकारंबिंदुभूषितम् ॥ दलांतरेतुह्रींकारान्ष्टौसर्वत्रविन्यसेत् ॥ ४ ॥ एवंसंलिख्यसंपूज्यशीततोविनिक्षिपेत् ॥ मुच्यतेत्रिदिनाद्रोगीज्वरद्वंद्वान्नसंशयः ॥ ५ ॥




उष्णोदकेतुसंक्षिप्तं ज्वरंशीतंविनाशयेत् हस्तमूलेतु तद्बद्धं ज्वरं वेलासमुद्भवम् ॥ ६ ॥ नाशयेन्नात्रसंदेहोभूनजंस्फारसुन्दरि ॥ ७ ॥ ॥इ.यं.चिं.ना.म.प्र.उ.सं. शा.दा. ज्वरशमनं नामसप्तमं यन्त्रम् ॥ ७ ॥ ॥

॥ ॥ श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्यामि-
बालानांरक्षणंसदा ॥ यंत्रंज्वलनरक्षाख्यमायुर्वृद्धि
करंपरम् ॥ १ ॥ पूर्वोक्तविधिनालेख्यंद्रव्यंपूर्वोदितैः
शुभैः ॥ भूर्जपत्रेतुसंलेख्यंसाध्यनामतुमध्यतः ॥
२ ॥ ततस्तद्वेष्टयेत्सम्यक्चतुःकोणंतुरेखया ॥ त
स्योपरिचतुःकोणंत्रिशूलंकोणतोलिखेत् ॥ ३ ॥
कोणांतरेलिखेद्बीजंचकारंबिंदुभूषितम् ॥ उपर्यधोंऽ
तरालेतु ह्रींकारंवि
लिखेद्बुधः ॥ ४ ॥
एवंसंलिख्यतद्यं
त्रंपूजयित्वाविधा
नतः ॥ त्रिलोहवे
ष्टितंकृत्वाबध्नीया
त्कंठमध्यतः ॥ ५
येचोपसर्गताः के-
चिद्रोगाः शारीर



मानसाः ॥ ईर्ष्याकोपस्तथादोषो दंतानांसंभवः पुनः
॥ ६ ॥ नबाधतेबालकस्य स्तन्यदोषः कदाचन ॥ ७ ॥

इतिश्रीयंत्रचिंतामणौ ना. म. म. उ. न. शा. दामोदरपंडितोद्धृते बालानांज्वरादिस्तम्भनंदंतरोगादिकृमिमोपद्रवनाशनमष्टमंयंत्रम् ॥ ८ ॥ ॥ ७ ॥ ॥ ॥श्रीशिवउवाच॥ ॥ अथातः संप्रवक्ष्यामि भूतापस्मारनाशनम् ॥ शाकिनीभूतवेतालैर्गृहीतोऽपिसदारुणैः ॥ १ ॥ तदातन्मोहनार्थाय कुर्याद्यंत्रं मनोहरम् ॥ स्वस्थस्यतुप्रकुर्वीत सतुदोषैर्नबाध्यते ॥२॥ द्रव्यैःपूर्वोदितैर्लेख्यं पूर्वोक्तविधिनाततः ॥ मध्येनामलिखित्वातु भूर्जपत्रेवरानने ॥ ३ ॥ वर्तुलं वेष्ट्यसंलेख्यं तस्योपरिदलाष्टकम् ॥ ह्रींकारंदलमध्येतु प्रत्येकं विलिखेत्पुनः ॥ ४ ॥ एवंसंलिख्य संपूज्य लोहत्रितयवेष्टितम् ॥ सुवर्णरजतंताम्रं त्रिलोहंपरिचक्षते ॥ ५ ॥



बालानांगलकेधार्यं यंत्रंत्रैपुरभैरवम् ॥ मुच्यतेबाल-

कोरोगादपस्माराद्दरानने ॥ ६ ॥ ॥ इतिश्रीयंत्र
चिंतामणौनाम्निम·प्र·उ·न· शां · बालानांदोषनाश
नंनामनवमंयंत्रम् ॥ ९ ॥ ॥ श्रीशिवउवाच ॥ ॥
अथातः संप्रवक्ष्यामिसर्पात्संरक्षणंपरम् ॥ सर्पादि
भिर्यथाबालःप्रौढोवाऽपिविशेषतः ॥ १ ॥ नदृश्यते
यथादेविप्रमादाद्वह्निशान्तयः ॥ पूर्वोक्तविधिनाले-
ख्यपूजयित्वाविधानतः ॥ २ ॥ मध्येनामालिखित्वातु



वर्तुलंतुद्विरेख-
या ॥ संवेष्ट्यच
दलान्यष्टौहंस-
बीजान्पृथक्पृ-
थक् ॥ ३ ॥
भिलोहवेष्टितं
कृत्वाबाहुमूले
तुधारयेत् ॥
नश्यंतिदर्शनात्त
स्यदंदशूकाश्चतुर्दिशम् ॥ ४ ॥ प्रमादात्पतितेपाद-
तिष्ठन्तिस्तंभिताध्रुवम् ॥ अथदष्टः प्रमादेनविषं-


नैवाऽधिरोहति ॥ ५ ॥ सर्पाणांस्तंभनार्थायथंत्रंगरु
डभाषितम् ॥ ६ ॥ ॥ इतिश्रीयं. चिं. ना. म. प्र.
उ. न. शा. टी. सर्पस्तंभनं नामदशमंयंत्रं ॥ १० ॥
॥ ॥श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्या
मिडाकिनीत्रासनम्परम् ॥ भूतप्रेतपिशाचाद्यैर्डाकि
नीब्रह्मराक्षसैः ॥ १ ॥ यदाग्रस्तोनरः कोपिनारीवा
बालकोऽपिवा ॥ तदायंत्रं प्रकुर्वीत त्रासार्थंभूतरक्ष
साम् ॥ २ ॥ खडिकयालिखित्वातुखर्परेनूतनशुभे ॥
चतस्त्रस्तिर्यगारेखाऊर्ध्वास्ताः पंचरेखिकाः ॥ ३ ॥

ह्रीं	ह्रीं	ह्रीं	ह्रीं
ह्रीं	ह्रीं	ह्रीं	ह्रीं
ह्रीं	ह्रीं	ह्रीं	ह्रीं

एवंभवंतिकोष्ठानांद्वादशैववरानने ॥ ह्रींकारंप्रतिको
ष्ठेतुविलिख्याथप्रपूजयेत् ॥ ४ ॥ बलिपुष्पोपहारैश्च
ततोधूल्याप्रपूरयेत् ॥ संस्थाप्यचाग्नेरुपरिज्वाल
येत्खदिराजलैः ॥ ५ ॥ रुदंतंचमहाभूतवेपमानंप
लायते ॥ तत्क्षणाद्बालकंत्यक्त्वादेशत्यागेनगच्छति


॥ ६ ॥ ॥ इतियंत्रचिं० ना० म० प्र० उ० न० दा० भूत
त्रासननामैकादशंयंत्रम् ॥ ११ ॥ ॥

॥श्रीशिवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामि-
ज्वरनिर्नाशनंपरम् ॥ निशाचररसेनैवलिखितंयंत्रमु
त्तमम् ॥ १ ॥ तांबूलपत्रेसंलेख्यबर्बुरस्यतुकंटकैः
॥ साध्यनामलिखित्वातुक्रोंकारपुटितंशुभम् ॥ २ ॥
षट्कोणमंडलंमध्ये प्रत्येकंप्रणवंलिखेत् ॥ कोणोप-
रितुह्रींकारंसर्वतोविलिखेत्क्रमात् ॥ ३ ॥ तांबूलं
भक्षणार्थंचपूज-
यित्वाप्रदीयते ॥
यंत्रस्यभक्षणाद्देवि
ज्वरोयातिनसंशयः
॥ ४ ॥ एकांतरक्ष-
णेनैवनाऽत्रकार्या
विचारणा ॥ ५ ॥
इतिश्रीयंत्रचिं० ना०
म० प्र० उ० न० शा०




दा० एकांतरज्वरनाशननामद्वादशंयंत्रम् ॥ १२ ॥ ॥

॥ ॥श्रीशिवउवाच॥ ॥अथातःसंप्रवक्ष्यामि
गर्भरक्षाकरंपरम्॥ हस्तीमदेनसंलेख्यंभूर्जपत्रेसु-
शोभने॥ १॥मध्येनामलिखित्वातुचतुःकोणंद्विरे-
खया॥ संवेष्टयकर्णिकाकार्यावर्तुलातुचतुर्दिशं॥२




यकारंचरकारंचविसर्गी
तंपृथक्पृथक्॥ कर्णि-
कामध्यतोलेख्याःपूर्वव
त्पूजयेत्क्रमात्॥ ३ ॥
लोहैकेनतुसंवेष्ट्यगर्भि-
ण्याःकंठतोन्यसेत्॥
सुखात्प्रसूतिर्भवति छ
लछिद्रंचनश्यति॥ ४॥ ॥इतिश्रीयंत्रचिं०ना०म०
प्र०उ०न०शां०दा०गर्भरक्षाकरंनामत्रयोदशंयंत्रं॥१३
॥ ॥श्रीशिवउवाच॥ ॥अथातःसंप्रवक्ष्या
मिअंतर्वत्नीसुरक्षणम्। यंत्रंयोनिव्यथाव्याधिदारु-
णामूलनाशनम्॥ १॥ पूर्वोक्तविधिनालेख्यंद्रव्यैः
पूर्वादितःक्रमात्॥ भूर्जपत्रेविधानेनमध्यदेशेविच-
क्षण॥२॥ प्रणवंचतथाह्रींचआद्यंतंनामतोलिखेत्॥

पत्वञ्चचतुःकोणंदीर्घंसंवेष्टयेरेखया ॥ ३ ॥ उपर्य्योऽपित्रिदलान्कोणेकेकेप्रतिष्ठितम् ॥ ह्रीं क्षंचतथाह्रींचकोणेदलगतंलिखेत् ॥ ४ ॥ क्रोंकारंचतथाह्रींचदलशेषेषुवैलिखेत् ॥ एवंसंलिख्यसंपूज्यलोहत्रितयवेष्टितम् ॥ ५ ॥ गर्भिण्याःकंठदेशेतुधार्ययंत्रंनसंशयः ॥ योनिश्शूलंशिरःशूलंभूतदोषःप्रणश्यति ॥ ६ ॥ सुखंप्रसूतिर्भवतिव्यथानाशंनसंशयः ॥ रहस्योऽयंसमाख्यातोयंत्रराजोमहाद्भुतः ॥ ७ ॥



इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पेप्रत्यक्षसि.द्ध.न.शांत्यधिकारेदा.गर्भिणीरक्षणंसुखप्रसूतिकरणंनामचतुर्दशंयंत्रम् ॥ १४ ॥

॥ ॥श्रीशिवउवाच॥ ॥अथातः संप्रव[illegible]
तृतीयज्वरनाशनं॥ द्रव्यैःपूर्वोदितैर्लेख्यं[illegible]
शनने ॥१॥ मध्येनामलिखित्वातुत्रिकोणवे[illegible]
॥तस्याधः स्वस्तिकंकार्यंतत्सर्वंवेष्टयेत्ततः ॥ २ ॥ च
तुःकोणंशिलाकारंतस्योपरिलिखेद्बुधः ॥यकारैःस
विसर्गान्तैर्विषमैर्वेष्टयेत्ततः ॥ ३ ॥ संपूज्यतस्यवे-
लायांबध्नीयाद्दक्षिणेकरे ॥ ज्वरोयातिनसंदेहोभूत-
जस्तुतृतीयकः ॥४॥ रोगजंनैवयात्येषोनयोज्यंत



त्रैवेकदा ॥ ५॥ इतिश्रीयंत्रचिं॰ना॰ म॰म॰उ॰न॰शां॰
दा॰ भूततृतीयज्वरनाशनंनामपंचदशंयंत्रं॥ १५॥

श्रीशिवउवाच॥ ॥अथातः संप्रवक्ष्यामि सर्वरक्षाकरंपरं॥ छलछिद्रहरंनाम सर्वतोभद्रसंज्ञकं ॥ १ ॥ ऊर्ध्वरेखाः पंचपंचतिर्यग्रेखास्तु संलिखेत् ॥ एवंकृते भवंत्येते कोष्ठाः षोडशसंज्ञकाः ॥ २ ॥ अकारपूर्वाः क्रमशो दिलिख्य सर्वत्र कोष्ठे निशिभूतजेऽह्नि ॥ भूर्जस्य पत्रे मृगनाभिचन्दनैर्हिमेन संमील्य लिखेत्क्रमेण तु॥ ३॥ संपूज्य पुष्पैर्विविधैश्च गंधैर्धूपैर्मनोज्ञैर्विविधोपचारैः ॥ संपूज्य विप्रान्वसनैर्धनैश्च यंत्रं च तद्भक्तियुतः समर्चयेत् ॥ ४ ॥ संवेष्ट्य लोहत्रितयेन पश्चात्संहृष्टचेता विधिवन्मनुष्यः ॥ तंधारयेद्दक्षिणबाहुमूले नारीगले यंत्रवरं प्रयत्नात् ॥ ५॥ तद्धारणात्प्राप्तमनः प्रसादं सर्वप्रियो भाग्ययुतः सतूर्णम् ॥ संजायते सर्वभयनहीनो लोके यथाप्राप्तमहाष्टसिद्धिः॥ ॥ ६ ॥ इतिश्रीयं·चिं·ता·म·प्रत्यक्षसि·उ·न·शां·दा·सर्वसौभाग्यवर्धनं सर्वतोभद्राख्यं षोडशयंत्रं ॥ १६॥

अ	आ	इ	ई
उ	ऊ	ऋ	ॠ
ऌ	ॡ	ए	ऐ
ओ	औ	अं	अः


॥ ॥श्रीशिवउवाच॥ ॥अथातःसंप्रवक्ष्यामियंत्रंद्यूतजयावहम् ॥ सर्वद्यूतेहिपरमंजयंस्याद्यंत्रधारणात् ॥ १॥ वाजिनःक्रममाख्यातंचतुःषष्टिस्तुकोष्टकं ॥ तद्धारणाज्जयंदेविद्यूतेसर्वत्रनिश्चितं ॥एरंडपत्रेसंलेख्यंलेखन्याकाकपिच्छया ॥ कज्जलस्यमषीकृत्वालिखेद्रात्रौशुचिस्मिते ॥ ३॥ तिर्यगूर्ध्वास्तुसंलेख्यानवरेखास्तुविस्तृताः ॥एवंभवंति

मे	खे	र	क्तं	द	ये	रु	पा
क	जि	ज	तं	द	नी	च	नः
छ	दा	वीं	य	मं	त्रं	ते	ष
हे	ष्टि	वा	मो	क्षि	ण	षा	त्रं
त्रं	पा	ण	क्षि	मो	वा	ष्टि	हे
ष	ते	त्रं	मं	य	वीं	दा	छ
नः	च	मी	द	तं	ज	जि	क
पा	रु	ये	द	क्तं	र	खे	मे

कोष्ठाश्चतुःषष्ठिर्वरानने ॥ ४ ॥ मध्येबीजाः सुसं
लेख्या ऽनुलोमप्रति लोमतः॥ तेएवबहिःपुनर्लेख्याः
शेषकोष्टेषुचक्रमात् ॥ ५ ॥ भैरवैरक्तदयेरुपाक
जिज्नंदनीचनः ॥ छदावीयमंत्रंतेषहेष्टिवामोक्षि-
णपात्रम् ॥ ६ ॥ एताएवतुर्बीजानिद्वात्रिंशद्विलि
खेत्क्रमात् ॥ दामोदरकवीन्द्रेणचित्रोबाजिक्रमः
कृतः ॥ ७ ॥ स्वेच्छयानीयतेयेनचतुःषष्टिपदंजनैः
॥ प्रसन्नंतुमयाप्रोक्तं यंत्रंचित्रंमनोहरम् ॥ ८ ॥
सर्वद्यूतेजयंप्रोक्तं धारणाज्जायतेप्रिये ॥ ९ ॥
इतिश्रीयंत्रचिं. ना. म. प्र. उ. न. शां. दा. द्यूतविजय
करंसप्तदशयंत्रम् ॥ १७ ॥

॥ श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्यामि
बंधमोक्षंमनोहरं ॥ बद्धोरुद्धः क्षणेनैवमुच्यतेयत्प्र-
सादतः ॥ १ ॥ यदाकेनापिसंरुद्धोनविन्देन्मुक्तिमा
त्मनः ॥ तदायंत्रंप्रकुर्वीततत्क्षणान्मुक्तिदायकम् ॥
२ ॥ कर्पूरकुंकुमेनैवभूर्जपत्रेसुविस्तृते ॥ लेखनीयं
प्रयत्नेनएकान्तेयंत्रमुत्तमम् ॥ ३ ॥ मध्येनामलि-
खित्वातुह्ल्लेखात्तदनंतरम् ॥ ततस्तद्वेष्टयेत्सम्य-


वर्तुलंतुद्विरेखया ॥ ४ ॥ मांमोचयेतिसर्वत्रचतुर्दिक्षु
वेष्टयेत् ॥ चतुःकोणंतुसंवेष्ट्यरेखाद्वितयकेनतु ॥



५ ॥ पूजनीयंप्रय-
त्नेनगन्धपुष्पैःफलै
श्शुभैः ॥ त्रिलोहवे
ष्टितंकृत्वाबाहुमूले
गलेऽथवा ॥ ६ ॥
धारणात्तत्क्षणान्मु
क्तः संसारइवनिर्भ
मः ॥ स्वस्थत्ताध
रणान्नित्यमवरो-
धःकदाचन ॥ ७ ॥ जायतेनैवसंदेहःस्वप्नेपिहिकदा
चन ॥ ८ ॥ ॥ इतिश्रीयं॰चिं॰ना॰म॰प्र॰उ॰न॰शां॰
बंधमोक्षणंनामाऽष्टादशंयंत्रम् ॥ १८ ॥

॥ ॥ श्रीशिवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामि
भवबंधविनाशनम् ॥ निर्वाणपदयोज्यंहिनिर्वेदपददा
यकम् ॥ १ ॥ षट्कोणस्यतुमध्येतुसाध्यनामप्रति-
ष्ठितम् ॥ निःसारसम्पुटंकृत्वाभूर्जपत्रेसुविस्तृते ॥

॥ २॥ निःसारंतुलिखेत्कोणे रोचनाचंदनेनतु ॥ ३ ॥
लोहमध्यगतंकृत्वारक्षयेच्छिरसासदा ॥ तद्धार
णात्क्रमेणैवविरक्तः संप्रजायते ॥ ४ ॥ ज्ञानयोगः



समासाद्यमुच्यतेनाऽ
त्रसंशयः ॥ पितृमि-
त्रकलत्रेषुनिर्मोहः सं
प्रजायते ॥ ५ ॥
निर्बन्धस्तुवनारण्यदु
र्गेपर्यटनंगिरौ ॥ जा
यतेनाऽत्रसंदेहोयो-
गीसर्वत्रपूजितः ॥
॥ ६ ॥ इतियं० चिं० ना० म० प्र० उ० न० ज्ञा० दामोदरपंडि
तोद्धृतेभवमोचनंनामएकोनविंशंयंत्रम् ॥ १९ ॥
॥ ॥ श्रीशिवउवाच ॥ ॥ अथातः संप्रवक्ष्या-
मिदुष्टसत्वात्प्रमोचनम् ॥ यदारण्येसरिद्दुर्गेदुष्टस-
त्वेनसाधितः ॥ १ ॥ तदायंत्रंप्रकुर्वीतवामहस्तत-
लोपरि ॥ निष्ठीवनेनह्रींकारंलिखित्वापूजयेत्तदा ॥
२ ॥ अनामोद्भवरक्तेनचतुर्दिक्षुप्रसिंचयेत् ॥ तत्स-

णान्मुच्यतेजंतुर्यावद्वीपीमहोरगैः ॥ ३ ॥ रुद्धोवृ-

ह्रीं

कैश्चहरिभिरन्यैर्दुष्टैर्नसंशयः ॥ ४ ॥

इतिश्रीयं·चिं·ना·म·प्र·उ·न·शां·दा·


दुष्टसत्वात्भमोचनंनामविंशंयंत्रम् ॥ २० ॥ ॥

इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पेप्रत्यक्षसिद्धिप्र-
दे उ० दामोदरपंडितोद्धृतेनवमपीठिकायुतोशांत्याधिका
रःसमाप्तः ॥ ॥ अथमोक्षाधिकारः ॥ ॥

आपादमस्तकनिबद्धजनःक्षणेनमोक्षंप्रयातिनिगडै-
श्चसुवेष्टितांगः ॥ यस्याज्ञयाजगतिदेवमनुष्यसिद्धा-
स्ताभक्तियुक्तमनसाप्रणतोऽस्मिबंदीम् ॥ १ ॥ अ-
धिकारमहद्वक्ष्येबंदीमोक्षकरंनृणाम् ॥ विश्वासात्त-
त्क्षणाद्देविसर्वकार्यप्रसाधकं ॥ २ ॥ देवानांमनुजे-
शिनांनृपजुषांस्त्रीणांशिशूनांततोबद्धानांनिगडैश्चि-
रंतनुजुषांमोक्षायसिद्धिप्रदम् ॥ ३ ॥ ॥

॥ श्रीशिवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामिबं-
दीमोक्षप्रसाधनम् ॥ यत्प्रसादात्क्षणेनैवबंदीमो-
क्षःप्रजायते ॥ १ ॥ साध्यनामलिखित्वातुवर्तुलं-
वेष्टयेत्ततः ॥ अपूपस्योपरिलेख्यधृतेनैवतुयन्त्रकं ॥

२॥ चतुर्दिक्षुचह्रींकारंलिखित्वावेष्टयेत्ततः॥ तत्रैव विविधैःपुष्पैर्नैवेद्यैःपरिपूजयेत्॥३॥ भक्षणार्थंप्रदातव्यमपूपंसुरसुंदरि॥ त्रिदिनान्मुच्यतेजंतुर्दुष्टबद्धोपिसत्तमे॥४॥ ॥




इतिश्रीयं·चिं·ना·म·प्र·उ·दशलपीठिकायांमोक्षाधिकारे द्वा: बंधनमोचनंनामप्रथमंयंत्रम्॥१॥ ॥

ऐं ह्रीं श्रीं बंदीदेव्यै अमुकस्यबंधमोक्षंकुरु कुरु मातर्नमः स्वाहा॥ अनेनमंत्रेणनामगृहीत्वापुनःप्रतिमंत्रेणगुग्गलवटिकाहोमयेत्॥ अष्टोत्तरशत सप्तविंशतिदिनपर्यंतंसर्वथाबंधमोक्षोभवतिनान्यथा॥ यंत्रकल्पविहितः सिद्धमंत्रोऽयम्॥

श्रीशिवउवाच॥ ॥अथातःसंप्रवक्ष्यामियंत्रंनिगडमोचनम्॥ हस्तपादतलेबद्धोमुच्यतेयत्प्रसादतः॥१॥ कांस्यपात्रोपरिलेख्यंरोचनाचंदनेनच॥ कर्पूरकुंकुमाभ्यांचमृगनाभियुतेनच॥ २॥ ह्रींकारं

मध्यदेशेतु वर्तुलं वेष्टयेस्ततः ॥ ततस्तु षोडशदलम-
कारादिस्वरान्वितान् ॥ ३ ॥ ततस्तद्वेष्टयेत्सम्यग्वर्तुलं
रेखया पुनः ॥ तस्योपरि प्रकर्तव्यं द्वात्रिंशद्दलसंयुतम्
॥ ४ ॥ ककारादिसकारान्तं व्यंजनानि लिखेत्क्रमात्



॥ प्रतिष्ठाप्यमहापूजांगंधपुष्पैःफलैःशुभैः ॥ ५ ॥ नैवेद्यैर्बलिहोमैश्चदीपदानैर्मनोहरैः ॥ ॐनमश्चंडिकायैस्वाहेतिमंत्रेणाऽष्टोत्तरशतञ्जुहुयात् ॥ पायसैर्मधुस्वाद्यैश्चगुग्गुलेनविशेषतः ॥ ६ ॥ मत्यहंतु प्रकर्तव्यसप्तमेऽहनिपूर्यते ॥ उद्धृत्यप्रणवःपूर्वं भोजनागंधरोचनम् ॥ ७ ॥ पानार्थमर्धदातव्यं गुटिकार्धेनकल्पयेत् ॥ तद्धारणात्प्रमुच्येताचिरंबद्धोऽपिमानवः ॥ ८ ॥ ॥ इतियंत्रचिन्तामणौना॰ म॰ प्र॰ उ॰ द॰ मो॰ दा॰ निगडबंधमोक्षकरं नामद्वितीयंयंत्रम् ॥ २ ॥ ॥ श्रीशिवउवाच ॥ ॥

अथातः सम्प्रवक्ष्यामियंत्रंवैबंधमोक्षणम् ॥ विधरेचारुबद्धोऽपिमुच्यतेयत्प्रसादतः ॥ १ ॥ ह्रींकारमध्यदेशेतुसाध्यनामचयत्नतः ॥ लिखित्वाभूर्जपत्रेतुरोचनाकुंकुमेनच ॥ २ ॥ तद्यंत्रंपूजयित्वातुवहमानेऽभसिक्षिपेत् ॥ तदम्भःपक्के नान्नेनभोजनंतस्यकारयेत् ॥ ३ ॥ एवं कृतेतृतीयेऽन्हिमुच्यतेनात्रसंशयः ॥ चिवरस्थोत्रयोबद्धोगूढस्थोऽपिविमुच्यते ॥ ४ ॥



इतिश्रीयंत्रचिंतामणौनाम्निमहाकल्पेप्रत्यक्षसि-
द्धिप्रदेउमामहेश्वरसंवादेदशमपीठिकायांमोक्षा-
धिकारेदामोदरपंडितोद्धृतेबंधमोक्षकरंनामतृतीयं
यंत्रम् ॥ ३ ॥ ॥ ॥

॥ यंत्रचिंतामणिंनामकल्पंश्रीशिवभाषितम् ॥
धर्मार्थकामफलदंवैरिनिग्रहकारणम् ॥ १ ॥ य
स्तुपूजयतेनित्यंधारयेद्वापिमानवः ॥ अवध्यःसर्व
लोकानांजायतेनात्रसंशयः ॥ २ ॥ शृणोतियस्तु
धर्मात्मावाच्यमानंकदापिच ॥ सोपिपूज्यश्चमान्य
श्चजायतेमत्प्रसादतः ॥ ३ ॥ यन्त्रचिंतामणिंयस्य
श्रुत्वाश्रद्धानजायते ॥ नवंधःपापकृद्देविदुर्भगोभु-
विनिश्चितम् ॥ ४ ॥ यस्तुश्रद्धाभियुक्तःसन्यन्त्रचिं

तामणिंश्रयेत् ॥ तेनसार्द्धंतुकः कुर्याद्विरुद्धंवैजि-
जीषुकः ॥ ५ ॥ अतःपरंकिंबहुनादितेनकल्पप्रभा
वंबहुधातुदेवि ॥ यः शुद्धरूपीजगतः प्रशास्ता म
त्तेजसाभातिसुशोभमानः ॥ ६ ॥ पुण्यंपवित्रंप-
रमंरहस्यंसुसारसंयत्परिकीर्तितंते ॥ चिंतामणिं
चिंतितकार्यसाधकंप्रत्यक्षकामादिफलप्रसाधकं
॥ ७ ॥ वश्याभिधानंप्रथमंद्वितीयमाकर्षणंस्तंभन-
कं तृतीयं ॥ विद्वेषणंमारणकंततश्चउच्चाटनंशांति
करंचसप्तमं ॥ ८ ॥ बंदीप्रसादजनकंतुमहाप्रभा-
वमत्यंतमुच्चाटनकंवदंति ॥ अष्टाधिकारंप्रवदंति
कल्पंचिंतामणौदेववरैः सुपूजिते ॥ ९ ॥ स्वर्गच्यु
तस्यबहुभाग्ययुतस्यपुंसः पुण्याधिकस्यबहुयोग
युतस्यलोके ॥ प्राप्तिर्भवेत्कल्पवरेणतस्ययेना-
र्चितोदेववरोमहेशः ॥ १० ॥ ॥ इतिश्रीयं-
त्रचिंतामणौनाम्निमहाकल्पेप्रत्यक्षसिद्धिप्रदे उ-
मामहेश्वरसंवादेदामोदरपण्डितोद्धृते दशमपीठि-
कायुक्तो मोक्षाधिकारः समाप्तः ॥ ॥

अथ सर्वसाधारणयन्त्रविधिः।

तत्रान्तरे सुस्नातः सुवस्त्रचंदनादिभिर्भूषितो यथोक्तद्रव्यैः शुद्धदेशे यंत्रं लिखेत् ॥ तत्रादौ षष्ठ्यंतं साधकपदं मध्ये बीजं तदधो द्वितीयांतं साध्यनाम तत्पार्श्वयोः कुरुकुरु तदधो वियद्युक्तं सर्गबीजं लिखेत् ॥ तत ईशानादिचतुष्कोणेषु हंसः सोऽहं प्राणबीजं चतुर्दिक्षु दिग्बीजानि प्रतिदिशं यंत्रगायत्रिवर्णान् लिखेत् ॥ ॥ यंत्रगायत्रिः ॥ ॥ यंत्रराजाय विद्महे महायंत्राय धीमहि ॥ तन्नो यंत्रः प्रचोदयात् ॥ इति यंत्रगायत्र्या प्राणप्रतिष्ठामंत्रवर्णैश्च यंत्रं सर्वतो वेष्टयेत् ॥ एवं यंत्रं लिखित्वा सावधानतया सुवर्णादिना वेष्टितं कृत्वा यंत्रप्रतिष्ठां कुर्यात् ॥ सा यथा ॥ सर्वतोभद्रमंडले ऽष्टदले वा कर्णिकायां कलशस्थापनविधिना कलशं संस्थाप्य तदुपरि यंत्रं स्थापयेत् ॥ मण्डलकोणचतुष्टये च तुः कलशान्संस्थाप्य प्रतिकलशं ॥ आं ह्रीं क्रों ॥ इति त्र्यक्षरीविद्यां कूर्चबीजयुतां सहस्रं जपेत् ॥

ततस्तद्यंत्रंचतुःकलशोदकैरभिषेकमंत्रैरभिषिच्य-
गन्धादिभिःसम्पूज्य यंत्रेप्राणप्रतिष्ठामंत्रेण यंत्र
देवताप्राणान्प्रतिष्ठाप्य यंत्रगायत्र्या यंत्रंषोडशोप
चारैः सम्पूज्य ब्राह्मणसुवासिनीःकुमारीश्चसंभो-
ज्यदक्षिणांदत्वातेषामाशिषोगृहीत्वा यथोक्तांगे
यंत्र बध्नीयात् ॥ अनुक्तलेखनस्थलेभूर्जपत्रम् ॥
अनुक्तलेखनद्रव्येकेसरगोरोचन कर्पूरकस्तूरीगज
मदचंदनागरुद्रव्याणि ॥ अनुक्तलेखनिकायां सु-
वर्णशलाका ॥ अनुक्तवेष्टनेसुवर्णं ॥ अनुक्तधा-
रणांगे दक्षिणबाहुः ॥ इतिसर्वसाधारण यंत्रविधिः

इतिश्रीयंत्रचिंतामणिःसमाप्तः

Digitized with financial assistance from the
Government of Maharashtra
on 23 January, 2019